# रञ्जिनी

( तृतीयो भागः )

## कक्षा 8



राजकीय विद्यालयों में निःशुल्क वितरण हेतु

**राजस्थान राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, उदयपुर**

प्रकाशक

**राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर**



www.rajteachers.com

संस्करण : 2016

© राजस्थान राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, उदयपुर
© राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर

मूल्य :

पेपर उपयोग : आर. एस. टी. बी. वाटरमार्क
80 जी. एस. एम. पेपर पर मुद्रित

प्रकाशक : राजस्थान राज्य पाठ्यपुस्तक मण्डल
2-2 ए, झालाना डूंगरी, जयपुर

मुद्रक :

मुद्रण संख्या :

सर्वाधिकार सुरक्षित

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भाग को छापना तथा इलैक्ट्रानिकी, मशीनी, फोटोप्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रसारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।
- किसी भी प्रकार का कोई परिवर्तन केवल प्रकाशक द्वारा ही किया जा सकेगा।

**पाठ्यपुस्तक निर्माण**
**वित्तीय सहयोगः**
**यूनिसेफ राजस्थान, जयपुर**



www.rajteachers.com

# आमुखम्

गतिमाने वातावरणे परिवर्तनम् आवश्यकं भवति, तेनैव विकासस्य गतिः तीव्रा भवति। विकासे अनेकानि तत्त्वानि महत्त्वपूर्णानि तेषु शिक्षा अतीव महत्त्वपूर्णं तत्त्वमस्ति। विद्यालयिशिक्षां प्रभावशालिनीं कर्तुं पाठ्यचर्यायां समये-समये परिवर्तनम् आवश्यकम्। वर्तमानकाले राष्ट्रियपाठ्यचर्यायाः आलेखः २००५ तथा च निःशुल्क-अनिवार्य-बालशिक्षा-अधिकाराधिनियमः २००९ एतद्द्वारा इदं स्पष्टं यद् अखिलशिक्षणस्य केन्द्रे बालकः एव प्रधानः भवति। अस्माकं शिक्षणप्रक्रिया एवं भवेत् यत् बालकः स्वयमेव अधिगमं कुर्यात्। अधिगमप्रक्रियायां बालकः स्वतन्त्ररूपेण शिक्षेत्, शिक्षकस्तु केवलं सहयोगी भवेत्। पाठ्यचर्यां वास्तविकरूपेण छात्रः प्राप्नुयात् एतदर्थं पाठ्य-पुस्तकं महत्त्वपूर्णं साधनम् अस्ति। परिवर्तमानायाः पाठ्यचर्यायाः सन्दर्भे पाठ्यपुस्तकेषु परिवर्तनं करणीयं भवति। अतएव राज्यसर्वकारेण नवीनं पाठ्यपुस्तकं निर्मितम्।

पाठ्यपुस्तकं सुगमं, रुचिपूर्णं, सुग्राह्यम् आकर्षकञ्च भवेत् येन बालकः सरलभाषया, विषयवस्तुनः चित्राणां, विभिन्नगतिविधिमाध्यमेन उपलब्धं ज्ञानं हृदयङ्गमं कर्तुं शक्नोति इति अवधानं पाठ्यपुस्तकनिर्माणे आवश्यकरूपेण कृतम्। छात्रः स्वसामाजिकेन, स्थानीयपरिवेशेण सम्बद्धानि ऐतिहासिक-सांस्कृतिक-संवैधानिकमूल्यानि प्रति स्वमनसि ज्ञानं निष्ठां च धारयन् सुसभ्यनागरिकरूपेण आत्मानं समाजे स्थापितुं शक्नोति।

शिक्षकेभ्यः मम विशेषाग्रहः यत् एतद्पुस्तकं न केवलं पाठ्यक्रमं पूरयितुं भवेद्, अपितु एतद्पुस्तकं स्वानुभवञ्च आधारीकृत्य छात्रम् विषयशिक्षणस्य उद्देश्यानि प्राप्त्यर्थम् अधिकाधिकानि अवसराः दद्यात्।

राजस्थान-राज्य-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-संस्थानम् उदयपुरम् पाठ्यपुस्तकानां विकासे सहयोगार्थं तान् सर्वान् संस्थानानि, सङ्गठनानि, लेखकान्, प्रकाशकाञ्च प्रति आभारम् अभिव्यनक्ति, ये पाठ्यपुस्तकानां निर्माणे, सामग्रीप्रदाने चयने च सहयोगं दत्तवन्तः। एषु NCERT राज्यसर्वकारः, विभिन्नाः राजकीयविभागाः, संस्थानानि, समाचारपत्राणि, पत्रिकाः, वेबसाइट सहैव संस्कृतभारती, विद्याभारती, सम्भाषण-सन्देशः इत्यादयः आभारयोग्याः सन्ति। सावचेतेऽपि यदि केषां लेखकानां, प्रकाशकानां संस्थानानां, सङ्गठनानां, वेबसाइट इत्यस्य च नामानि नोल्लिखितानि तदपि तेषां आभारि भवद् क्षमाप्रार्थि अस्ति। तेषां नामानि ज्ञाते सति आगामी संस्करणेषु तेषां नामानि अपि योजयिष्यन्ते।

पाठ्यपुस्तकानां गुणवत्तां वर्धयितुं प्रारम्भिकशिक्षाशासनसचिवं श्रीमन्तं कुञ्जीलालमीणां,



www.rajteachers.com

माध्यमिकशिक्षाशासनसचिवं राष्ट्रियमाध्यमिकशिक्षापरिषद्-आयुक्तं च श्रीमन्तं नरेशपालगंगवारं, प्रारम्भिकशिक्षानिदेशकं श्रीमन्तं बाबूलालमीणां, माध्यमिकशिक्षानिदेशकं श्रीमन्तं सुवालालं, राजस्थानप्रारम्भिकशिक्षापरिषद्-आयुक्तं श्रीमन्तं बी.एल. जाटावतं प्रति हृदयेन आभारमभिव्यनक्ति। येषां अमूल्यैः परामर्शैर्मार्गदर्शनैश्च पुस्तकमिदं गरीयः श्रेयः च भवितुं शक्तं जातम्।

अस्य पाठ्यपुस्तकस्य निर्माणं संयुक्तराष्ट्र-बालकोषस्य (UNICEF) वित्तीय सहयोगेन अभवत्। संस्थानं संयुक्तराष्ट्र-बालकोषस्य राजस्थानप्रमुखः सेम्युअल एमं., शिक्षा-विशेषज्ञा डॉ. सुलग्ना रायं बालकोषस्य सम्बद्ध-अधिकारिणः च प्रति आभारं प्रदर्शयति येषां सहयोगं विना कार्यमिदं सफलतां न गतं स्यात्। संस्थानं सर्वाधिकारिणाम् कार्मिकाणां च ये अस्मिन् कार्यसम्पादने प्रत्यक्ष-अप्रत्यक्ष रूपेण सहयोगं कृतवन्तः तेषां प्रशंसां करोति।

माम् एतद्पुस्तकं भवताम् हस्तेषु समर्पयन् अतीवप्रसन्नता भवति। आशासे एतद् पाठ्यपुस्तकं न केवलं छात्रेभ्यः शिक्षकेभ्यश्च उपयोगि भविष्यति अपितु प्रभावशालि अपि भविष्यति।

विचाराणां परामर्शाणां समादरः लोकतन्त्रस्य वैशिष्ट्यम्। अतः राजस्थान-राज्य-शैक्षिक-अनुसन्धान एवं प्रशिक्षण-संस्थानम् उदयपुरम् सर्वदा एतद् पुस्तकं गुणवत्तापूर्णं कारयितुं भवतां विमर्शाणां स्वागतं करिष्यति।

**निदेशकः**

राजस्थान राज्य शैक्षिक अनुसंधान
एवं प्रशिक्षण संस्थानम्, उदयपुरम्



www.rajteachers.com

# पाठ्यपुस्तक निर्माण समिति

संरक्षक : विनीता बोहरा, निदेशक, एस. आई. ई. आर. टी., उदयपुर।

मुख्य समन्वयक : नारायण लाल प्रजापत, उपनिदेशक प्रभारी पाठ्यपुस्तक निर्माण, एस. आई. ई. आर. टी. उदयपुर।

समन्वयक : डॉ. नर्बदाशंकर श्रीमाली, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

लेखक / सम्पादक समूह :

डॉ. शक्ति कुमार शर्मा 'शकुन्त' से. नि. सहाचार्य ज.ना.रा.वि., उदयपुर । (संयोजक)

डॉ. सुरेश चन्द्र गोयल, व. व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

शारदा स्वामी, वरिष्ठ व्याख्याता, डाईट, जोधपुर

विक्रम शर्मा, प्रधानाचार्य, सरस्वती विद्या मंदिर उ.मा.वि., मंडिया रोड, पाली

दुर्गाशंकर पारीक, उपनिरीक्षक संस्कृत शिक्षा, अजमेर संभाग, अजमेर

गायत्री जोशी, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

ब्रजबाला भटनागर, से. नि. व्याख्याता, एस.आई.ई.आर.टी.,उदयपुर

डॉ. प्रमोद कुमार वैष्णव, व्याख्याता, रा. महाविद्यालय, कोटा

राजेन्द्र कुमार शर्मा, व्याख्याता, राजकीय उ. मा. विद्यालय, देईखेड़ा, बूंदी

परमानन्द शर्मा, व्याख्याता, रा.उ.मा.वि., आंगुचा, भीलवाड़ा

डॉ. आशुतोष पारीक, व्याख्याता, सनातन धर्म रा. महाविद्यालय, ब्यावर, अजमेर

द्वारका लाल चौबदार, व्याख्याता, डाईट, कोटा

डॉ. माधवेश्वर चौधरी, व्याख्याता, रा.वरि. उपा. संस्कृत वि., तीतरिया, जयपुर

डॉ. प्रवीण पण्ड्या, व्याख्याता, आदर्श राजकीय उ. मा. वि., सांचोर, जालोर

संयम प्रकाश जैन, व्याख्याता, रा. उ. मा. वि., हरमाड़ा, जयपुर

रविशंकर शर्मा, व्याख्याता, रा. उ. मा. वि., आदर्श नगर, जयपुर

रामप्रसाद शर्मा, प्र. अ. रा. मा. विद्यालय, पचीपल्या सवाईमाधोपुर

लादूराम सीरवी, प्र. अ. आ. वि. मं. मा., ब्यावर, अजमेर

गगेन्द्रसिंह आर्य, प्र.अ. आदर्श विद्यामन्दिर मा. वि. रामगढ़, जैसलमेर

**निःशुल्क वितरण हेतु**



www.rajteachers.com

| | | |
|---|---|---|
| | | बलदेव कुमार, प्र.अ., आदर्श विद्या मन्दिर माध्यमिक, आबूरोड, सिरोही |
| | | दुर्गसिंह पंवार, व. अ. हनवन्त आदर्श वि. मं.उ.मा. लालसागर, जोधपुर |
| | | मधुसूदन शर्मा, व.अ., राजकीय आदर्श उ.मा. विद्यालय, सावर, अजमेर |
| | | डॉ. अनीता अग्रवाल, अध्यापिका रा. उ. प्रा. वि., मानसरोवर, जयपुर |
| | | श्रवणकुमार विश्नोई, अ. हनवन्त आ.विद्या मन्दिर उ.मा. लालसागर, जोधपुर |
| | | पवन कुमार राजोरा, अध्यापक, रा. उ. प्रा. वि., कोशीथल, भदेसर, चित्तौड़गढ़ |
| | | श्रवण कुमार त्रिवेदी, अध्यापक आ. विद्या मन्दिर, माध्यमिक, सुमेरपुर, पाली |
| आवरण एवं साज–सज्जा | : | डॉ. जगदीश कुमावत, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर। |
| चित्रांकन | : | डॉ. राजेन्द्र कुमार वैरागी, व्याख्याता, रा. महात्मा गाँधी उ.मा.वि., रामपुरा, कोटा |
| | | गोपाल लाल नाराणीवाल,अध्यापक, रा.प्रा.वि. बुथेल, कुराबड़, उदयपुर |
| तकनीकी सहयोग | : | हेमन्त आमेटा, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर। |
| | : | अभिनव पण्ड्या, क.लि., एस. आई. ई. आर. टी., उदयपुर। |
| कम्प्यूटर ग्राफिक्स | : | अविनाश कुमावत, शब्द संसार, जयपुर |
| | | गोपाल लोहार, प्रेमलता लोहार, हरिश रावत |



www.rajteachers.com

# शिक्षकेभ्यः

कस्य अपि विषयस्य शिक्षणसाफल्याय अध्यापकाः एव आधारभूताः सन्ति। पुस्तकपाठनकाले निम्नबिन्दून् प्रति अध्यापकाः अवधानं दद्युः इति अपेक्षा वर्तते।

१. संस्कृतशिक्षणं षष्ठीकक्षात् प्रारभ्यते। अतः छात्रेभ्यः संस्कृतध्वनिनां श्रवणस्य ग्रहणस्य च पर्याप्तः अवसरो देयः। अस्य कृते सुभाषितानां, संवादानां च माध्यमेन कक्षायाः वातावरणं संस्कृतमयं कुर्यात्।

२. पुस्तकं संस्कृतमाध्यमेन पाठयेयुः इति सर्वकारस्य अस्माकं च मनीषा वर्तते । अतः अध्यापकाः सरलसंस्कृत माध्यमेन, चित्रमाध्यमेन प्रतिकृतिमाध्यमेन, क्रियामाध्यमेन, प्रश्नोत्तरमाध्यमेन विषयवस्तु स्पष्टं कारयेयुः।

३. श्लोकस्य पाठसमये उचित-गति-लय-आरोह-अवरोहेषु ध्यानम् अपेक्षितं वर्तते। श्लोकानां गानं वैयक्तिकरूपेण सामूहिकरूपेण च कारयितुं शक्यते।

४. संवादपाठानां अभिनयं कारयित्वा पाठयेयुः।

५. कथापाठानां पाठनकाले आरम्भे सम्पूर्ण-कथायाः सारं श्रावयित्वा क्रमशः प्रत्येकं पंक्तिः प्रश्नोत्तरमाध्यमेन स्पष्टं कारयतु।

६. पाठे आगतानि भाषातत्त्वानि स्पष्टीकरणाय केचन शब्दाः स्थूलाक्षरैः मुद्रिताः सन्ति तान् विशेषतः स्पष्टीकृत्य योग्यताविस्तारमध्ये समागतान् नियमान् अधिक-उदाहरणैः स्पष्टेयुः।

७. समकालिक-सांस्कृतिक-वातावरणं दृष्ट्वा ज्ञानस्य सततं विकासं कुर्यात्। निरन्तरं तेषां मूल्याङ्कनञ्च भवेत्। अस्मिन् सन्दर्भे क्रियात्मक-गतिविधयः, क्रीडामञ्चनं, परियोजना, ज्ञानस्य सङ्कलनम् इत्यादिप्रायोगिक-गतिविधिभिः शिक्षणं आनन्ददायि सरसं च भवेत् इत्यपि अवधेयम्। अभिभावकाः अपि छात्राणां योग्यताविकासाय अवधानं दद्युः शिक्षकाणां च सहयोगं कुर्युः।



www.rajteachers.com

# अनुक्रमणिका


| पाठक्रमाङ्कः | पाठस्य नाम | पृष्ठसंख्या |
|---|---|---|
| प्रथमः पाठः | वन्दना | १ |
| द्वितीयः पाठः | विद्यायाः बुद्धिरुत्तमा | ५ |
| तृतीयः पाठः | ध्येयवाक्यानि | १२ |
| चतुर्थः पाठः | वीराङ्गना हाडीरानी | १९ |
| पञ्चमः पाठः | गीतामृतम् | २४ |
| षष्ठः पाठः | प्राचीन-भारतीय-वैज्ञानिकाः | ३१ |
| सप्तमः पाठः | स्वागतं ते राजस्थाने | ३७ |
| अष्टमः पाठः | मृदपि च चन्दनम् | ४४ |
| नवमः पाठः | यौतकं पातकम् | ४९ |
| दशमः पाठः | दीनबन्धुः विवेकानन्दः | ५९ |
| एकादशः पाठः | सुभाषितानि | ६५ |
| द्वादशः पाठः | सूर्यो न तु तारा | ७१ |
| त्रयोदशः पाठः | संहतिः श्रेयसी पुंसाम् | ७९ |
| चतुर्दशः पाठः | भारतीयकाल-गणना | ८६ |
| पञ्चदशः पाठः | स्वच्छं भारतम् | ९३ |
| षोडशः पाठः | कर्तव्यपालनम् | ९९ |
| सप्तदशः पाठः | धेनुमहिमा | १०३ |
| परिशिष्टम् | अपठित-गद्यांशः, निबन्धः, कथालेखनम्, वाक्यनिर्माणम्, वाक्यक्रम-संयोजनम्, पत्रलेखनम्, वर्णोच्चारणस्थानानि, इमानि अपि अवलोकयत। | ११० |




www.rajteachers.com

प्रथमः पाठः
१

# वन्दना



**या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।**
**या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।१ ।।**

**भावार्थः –** या सरस्वती कुन्दपुष्पमिव चन्द्रमिव हिममिव च धवलं हारं धारयति। या श्वेतवस्त्रैः आवृता वर्तते। यस्याः हस्ते वीणा शोभायमाना अस्ति। या सरस्वती श्वेतकमले आरूढा वर्तते। यस्याः अर्चनं ब्रह्मविष्णुमहेशादयाः देवाः अपि कुर्वन्ति। सम्पूर्णां जडताम् अज्ञानतां वा विनाशयितुं समर्था सा सरस्वती मां रक्षतु।

**शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद् व्यापिनीम्,**
**वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।**
**हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्,**
**वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।।२ ।।**

**भावार्थः –** ब्रह्मविद्यायाः सारस्वरूपा आद्यशक्तिः सम्पूर्णे विश्वे विद्यमाना, शुभ्रवर्णीया, सम्पूर्णाम् अज्ञानतां विनाशिनी, हस्तयोः वीणां, पुस्तकं, स्फाटिकमौक्तिकानां मालां धारयति। या कमलासने स्थिता तां बुद्धिदायिनीं भगवतीं सरस्वतीम् अहं वन्दे।


www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| कुन्दम् | श्वेतवर्णीयं पुष्पविशेषम् | कुन्द पुष्प |
| इन्दुः | शशिः | चन्द्रमा |
| तुषारः | हिमं | बर्फ |
| धवला | श्वेता | सफेद |
| शुभ्रम् | स्वच्छम् | स्वच्छ |
| वस्त्रावृता | वस्त्रेण आच्छादिता | वस्त्र से ढकी हुई। |
| पद्मासना | कमले आसीना | कमल पर बैठी हुई |
| अच्युतः | विष्णुः | भगवान् विष्णु |
| प्रभृतिभिः | इत्यादिभिः | इत्यादि से |
| पातु | रक्षतु | रक्षा करे |
| निःशेषः | सम्पूर्णः | सम्पूर्ण |
| जाड्यापहा | अज्ञानस्य अपहर्त्री | अज्ञान को हरने वाली |
| जगद्व्यापिनीम् | संसारे विद्यमानाम् | सम्पूर्ण विश्व में व्याप्त रहने वाली को |
| अभयदाम् | निर्भयकारिणीम् | अभय देने वाली को |
| जाड्यम् | अज्ञानताम् | अज्ञानता को |
| अपहाम् | हारिणीम् | हरने वाली को |
| स्फाटिकमालिकाम् | स्फाटिकमौक्तिकमालाम् | स्फटिक नामक मोतियों की माला को |
| विदधती | धारयन्ती | धारण करती हुई |
| संस्थिताम् | सम्यक् रूपेण स्थिताम् | विराजमान |
| बुद्धिप्रदाम् | बुद्धिप्रदायिनीम् | बुद्धि प्रदान करने वाली को |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| कुन्देन्दुः | शुभ्रवस्त्रावृता | पद्मासना | ब्रह्मा |
| शङ्करप्रभृतिभिः | निःशेषजाड्यापहा | आद्याम् | अन्धकारापहाम् |
| स्फाटिकमालिकाम् | संस्थिताम् | | |



www.rajteachers.com

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन वदत -**

(क) कुन्देन्दुतुषारहारधवला का ?

(ख) सरस्वती कुत्र आसीना ?

(ग) सरस्वती हस्ते किं विदधति ?

(घ) कीदृशीं शारदां वन्दे ?

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) सरस्वती केन वस्त्रेण आवृता ?

(ख) सरस्वती कैः देवैः वन्दिता ?

(ग) शारदा कस्य अपहा ?

(घ) सरस्वत्याः हस्तयोः किं धारितम् ?

(ङ) का जगद्व्यापिनी ?

**२. रिक्तस्थानं पूरयत -**

(क) या ...................... वरदण्डमण्डितकरा ।

(ख) देवैः ........................ वन्दिता ।

(ग) वन्दे तां ....................... भगवतीम् ।

(घ) ................... धारिणीमभयदाम् ।

(ङ) बुद्धिप्रदां .................................. ।

**३. मञ्जूषातः पर्यायपदं चित्वा लिखत -**

| रक्षतु, सम्पूर्णः, इत्यादिभिः, शशिः, तमः |
|---|

(क) इन्दुः - .......................................................

(ख) प्रभृतिभिः - .......................................................

(ग) अन्धकारः - .....................................................

(घ) पातु - .......................................................

(ङ) निःशेषः - .......................................................



www.rajteachers.com

**४. सन्धिविच्छेदं कुरुत -**

(क) ब्रह्माच्युतः - ................................ + ................................

(ख) कुन्देन्दुः - ................................ + ................................

(ग) पद्मासना - ................................ + ................................

(घ) परमामाद्या - ................................ + ................................

(ङ) जाड्यान्धकारापहाम् - ................................ + ................................

## योग्यता-विस्तारः

**ॐ सह नाववतु सह नौ भुनक्तु, सह वीर्यं करवावहै ।**
**तेजस्विनावधीतमस्तु मा विद्विषावहै ।।**
**ॐ शान्तिः शान्तिः शान्तिः ।।**

**भावार्थः :** - स ईश्वरः आवां गुरुशिष्यौ एकशः रक्षतु, एकशः पातु, आवाम् एकशः पराक्रमं कुर्वः, आवयोः पठितं ज्ञानं तेजस्वी भवतु, आवां परस्परं द्वेषं न कुर्वः, सर्वत्र शान्तिः भवतु, शान्तिः भवतु, शान्तिः भवतु।

**( क ) भाव-विस्तार : -**

⇨ भारतीयज्ञानपरम्परायां सरस्वती विद्यायाः देवतारूपे प्रतिष्ठिता वर्तते। अस्माकं साहित्यपरम्परायां ग्रन्थस्य निर्विघ्नं समाप्त्यर्थं ईश्वरं प्रति प्रार्थना मङ्गलाचरणमुच्यते।

**अधोलिखिता सरस्वतीवन्दना अपि स्मरणीया**

जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः।
नादब्रह्ममयि जय वागीश्वरि! शरणं ते गच्छामः ।। जय ....... ।।
त्वमसि शरण्या त्रिभुवनधन्या, सुरमुनि-वन्दित चरणा।
नवरसमधुरा कवितामुखरा, स्मित-रुचि-रुचिराभरणा ।। जय ....... ।।
आसीना भव मानसहंसे, कुन्द-तुहिन-शशि-धवले।
हर जडतां कुरु बोधिविकासं, सित-पङ्कज-तनु-विमले ।। जय ....... ।।
ललितकलामयि ज्ञानविभामयि, वीणा-पुस्तक-धारिणी।
मतिरास्तां नो तव पदकमले, अयि कुण्ठाविष-हारिणी ।। जय ....... ।।

**( ख ) भाषाविस्तारः -**

**पा धातुः लोट्लकारः ( आज्ञार्थक-कालः )**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पातु | पाताम् | पान्तु |
| मध्यमपुरुषः | पाहि | पातम् | पात |
| उत्तमपुरुषः | पानि | पाव | पाम |



www.rajteachers.com

द्वितीयः पाठः २

# विद्यायाः बुद्धिरुत्तमा

## ( अव्ययानां प्रयोगः )

प्रस्तुतः पाठः विष्णुशर्मणा विरचितात् पञ्चतन्त्रात् कथाग्रन्थात् उद्धृतः। अस्यां कथायां ब्राह्मणबालकानां माध्यमेन विद्यायाः अपेक्षया बुद्धेः श्रेष्ठता सम्पादिता।



कस्मिंश्चिद् ग्रामे चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावेन वसन्ति स्म। चतुर्षु त्रयः शास्त्रपारङ्गताः **परन्तु** बुद्धिरहिताः। एकस्तु बुद्धिमान् **किन्तु** शास्त्रविमुखः। ते कदाचिद् मन्त्रणाम् अकुर्वन्– "यदि विदेशं गत्वा प्रभूतं धनं नार्जयाम तर्हि विद्यया किं प्रयोजनम् ? तत् पूर्वदेशं गच्छामः।"

एवं किञ्चिद् मार्गं गते तेषु ज्येष्ठतरः अवदत् – "अहो! अस्मासु एकः अशिक्षितः **केवलम्** अस्ति बुद्धिमान्। न च राजप्रतिग्रहो बुद्धिबलेन प्राप्स्यति विद्यां **विना**। **अतः** अस्मै स्वोपार्जितं धनं **न** दास्यामि। त्वं स्वगृहं गच्छ यतस्ते विद्या नास्ति।" ततः द्वितीयः अवदत् – "भोः सुबुद्धे! त्वं स्वगृहं गच्छ **यत**स्त्वं विद्यारहितः असि।" **ततः** तृतीयेन उक्तम् – "**अहो** नोचितम् एवं कर्तुं **यतो** हि वयं बाल्यकालाद् **एव** एकत्र क्रीडिताः। **अतः** आगच्छतु महानुभाव! भवान् अस्मद् उपार्जितस्य वित्तस्य समभागी भविष्यति।"




www.rajteachers.com



तथा कृते ते मार्गे अरण्यस्य **अन्तः** कतिचिद् अस्थीनि अपश्यन् **ततः** एकेनोक्तम्- ''अहो अद्य विद्याप्रत्ययः कर्तव्यः। किञ्चिद् सत्वम् एतद् मृतं तिष्ठति। तद् विद्याप्रभावेण जीवनसहितं कुर्मः। अहम् अस्थिसञ्चयं करोमि।'' ततः तेनोत्सुकतया अस्थिसञ्चयः कृतः।

द्वितीयेन क्रमशः चर्ममांसरुधिरं च संयोजितम्।

तृतीयः **अपि** यावज्जीवनं सञ्चारयति तावत् सुबुद्धिः निषेधितवान् अवदच्च - ''भोः तिष्ठतु भवान्। एषः सिंहः रच्यते। यदि एनं सजीवं करिष्यति **चेद्** अयं निश्चयेन सर्वान् **अपि** खादिष्यति।''



सः अकथयत्-''**धिङ्** मूर्ख! **तूष्णीं** भव। अहं विद्यां विफलां न करोमि **सम्प्रति**।'' तेन बुद्धिमता उक्तम्-''**तर्हि** प्रतीक्षां कुरु क्षणं यावत्, अहं वृक्षम् आरोहामि।'' तथाचरितं **यावत्** सः सजीवः कृतः **तावत्** ते त्रयः अपि सिंहेन उत्थाय मारिताः। सः पुनः वृक्षाद् अवतीर्य गृहं गतः।

अत एवोच्यते -

**वरं बुद्धिर्न सा विद्या, विद्यायाः बुद्धिरुत्तमा।**
**बुद्धिहीना विनश्यन्ति, यथा ते सिंहकारकाः।।**



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
| --- | --- | --- |
| शास्त्रपारङ्गताः | शास्त्रे निपुणाः | शास्त्रों के विद्वान् |
| शास्त्रविमुखः | शास्त्रपराङ्मुखः | शास्त्र से विमुख |
| मन्त्रणाम् | विमर्शम् | सलाह को |
| प्रभूतं | अत्यधिकम् | बहुत अधिक |
| राजप्रतिग्रहः | राजदानम् | राजा द्वारा दिया गया दान |
| वित्तस्य | धनस्य | धन का |
| अस्थीनि | कङ्कालांशानि | हड्डियाँ |
| विद्याप्रत्ययः | विद्यायाः परीक्षा | विद्या की परीक्षा |
| सत्वं | जीवः | प्राणी |
| अरण्यस्य | वनस्य | जंगल को |
| तेनोत्सुकतया | तेन उत्कण्ठापूर्वकम् | उसके द्वारा उत्सुकता से |
| संयोजितम् | समायोजितम् | जोड़ कर खड़ा किया |
| रच्यते | विनिर्मीयते | बनाया जा रहा है |
| तथाचरितम् | तथा कृतम् | वैसा किया |
| तूष्णीम् | मौनम् | चुप |

## अभ्यासः

### मौखिकप्रश्नाः

**१. अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

कस्मिंश्चिद् शास्त्रपारङ्गता शास्त्रविमुखः प्रभूतम्
मन्त्रणाम् अस्थिसञ्चयः तेनोत्सुकतया

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) कतिपुत्राः बुद्धिरहिताः आसन् ?
(ख) कस्य समीपं विद्या नासीत् ?
(ग) चर्ममांसरुधिरं केन संयोजितम् ?
(घ) सिंहं सजीवं कः करोति ?
(ङ) का वरम् अस्ति ?


www.rajteachers.com

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) धनार्जनाय ब्राह्मणपुत्राः कुत्र गच्छन्ति ?

(ख) ''एषः सिंहः रच्यते'' इति कः उक्तवान् ?

(ग) शास्त्रविमुखः कः आसीत् ?

(घ) ते त्रयः केन मारिताः ?

(ङ) कस्मात् बुद्धिः उत्तमा ?

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

(क) प्रस्तुतः पाठः कस्मात् ग्रन्थात् सङ्कलितः ?

(ख) केन प्रभावेन सिंहः सजीवः अभवत् ?

(ग) ''भोः तिष्ठतु भवान्'' इति कः निषेधितवान् ?

(घ) सुबुद्धिः कस्माद् अवतीर्य गृहं गतः ?

(ङ) के विनश्यन्ति ?

**३. रेखाङ्कितपदान् आधारीकृत्य प्रश्ननिर्माणं कुरुत –**

(क) ते <u>मन्त्रणाम्</u> अकुर्वन् ?

(ख) कस्मिंश्चिद् ग्रामे चत्वारो <u>ब्राह्मणपुत्राः</u> वसन्ति स्म ?

(ग) तेन <u>सिंहः</u> सजीवः कृत ?

(घ) प्रथमः <u>अस्थिसञ्चयं</u> करोति ?

(ङ) <u>सुबुद्धिः</u> वृक्षाद् अवतीर्य गृहं गतः ?

**४. मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत –**

| सिंहेन , वृक्षाद् , बुद्धिमान् , बाल्यकालाद्, एकः , चतुर्थः , विद्या , विद्यायाः , विफलां |
|---|

(क) एकस्तु ........................... किन्तु शास्त्रविमुखः।

(ख) अहो अस्मासु ...................................... मूढः।

(ग) त्वं स्वगृहं गच्छ यतस्ते ......................... नास्ति।

(घ) वयं ................................एव एकत्र क्रीडिताः।

(ङ) ते त्रयः अपि ......................... उत्थाय मारिताः।



www.rajteachers.com

**५. उदाहरणं दृष्ट्वा निर्देशानुसारं रिक्तस्थानानि पूरयत –**

**उदाहरणम्** – अतः ............................ स्वोपार्जितं धनं न दास्यामि।

(एतद्शब्दः चतुर्थीविभक्तिः एकवचनम्)

**उत्तरम्** – अतः अस्मै स्वोपार्जितं धनं न दास्यामि।

(क) गच्छ यतः ....................................... विद्या रहितः असि।

(युष्मद्शब्दः प्रथमाविभक्तिः एकवचनम्)

(ख) ते मार्गे ......................................... अन्तः कतिचिद् अस्थीनि अपश्यन्।

(अरण्यशब्दः षष्ठीविभक्तिः एकवचनम्)

(ग) अहं ............................................. विफलां न करोमि।

(विद्याशब्दः द्वितीयाविभक्तिः एकवचनम्)

(ङ) .................................................. अवतीर्य गृहं गतः।

(वृक्षशब्दः पञ्चमीविभक्तिः एकवचनम्)

**६. उचितपदेन सह सुमेलनं कुरुत –**

| | |
|---|---|
| (क) एकेन | (अ) मारिताः। |
| (ख) द्वितीयेन | (आ) वृक्षारोहणम्। |
| (ग) तृतीयेन | (इ) अस्थिसञ्चयम्। |
| (घ) चतुर्थेन | (ई) चर्ममांसरुधिरसंयोजनम्। |
| (ङ) सिंहेन | (उ) जीवनं सञ्चारणम्। |

**७. उचित अव्ययेन रिक्तस्थानम् पूरयत –**

(क) गृहीत .......... केशेषु मृत्युना धर्ममाचरेत् । ( सह, खलु, इव, च )

(ख) न चौरहार्यं न ........ राजहार्यं न, भ्रातृभाज्यं न च भारकारि । ( यथा, च, तु, ना )

(ग) व्यये कृते वर्धते .......... नित्यं विद्याधनं सर्वधनप्रधानम् । ( एव, इव, च पुनः )

(घ) आत्मनः प्रतिकूलानि परेषां .......... समाचरेत। ( च, यद्यपि, क्व, न )

(ङ) सत्यम् .......... जयते नानृतम्। ( श्वः, अद्य, तदा, एव )



www.rajteachers.com

## योग्यता-विस्तार:

### ( क ) ग्रन्थपरिचय:

पञ्चतन्त्रनामकस्य कथाग्रन्थस्य रचयिता विष्णुशर्मा अस्ति। अस्मिन् ग्रन्थे पञ्चतन्त्राणि सन्ति –

१. मित्रभेद: २. मित्रसम्प्राप्ति: ३. काकोलूकीयम् ४. लब्धप्रणाशम् ५. अपरीक्षितकारक:

महिलारोप्य नाम नगरे अमरशक्ति: नाम राजा आसीत्। तस्य बाहुशक्ति:, उग्रशक्ति:, अनन्तशक्तिश्च नामान: त्रय: मूर्खपुत्रा: आसन्। विष्णुशर्मा तान् राजकुमारान् बोधयितुम् एतस्य कथाग्रन्थस्य रचनाम् अकरोत्। अस्मिन् ग्रन्थे पशुपक्षीन् पात्राणि मत्वा सरलभाषया विविधेषु ग्रन्थेषु सूक्तीन् उदाहरणानि च सङ्गृह्य बालकथा: अरचयत्। निश्चयेन कथाग्रन्थोऽयम् बालानां कृते बहु प्रेरणादायक: अस्ति। एतादृशा: कथाग्रन्था: शुकसप्तति:, वैतालपञ्चविंशति: सिंहासनद्वात्रिंशिका, हितोपदेश:, कथासरित्सागर: इत्यादय: सन्ति।

### ( ख ) भाषा विस्तार:

अव्ययप्रयोग: – सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

अव्ययानां प्रकाराणि – १. उपसर्गा: २. क्रियाविशेषणम् ३. समुच्चयबोधकम्
४. मनोविकारसूचकम् ५. अन्यप्रकीर्णानि च।

### अव्ययज्ञान-तालिका

| क्र.सं. | अव्ययम् | अर्थ | प्रयोग: |
|---|---|---|---|
| १. | यदा | जब | **यदा** श्रीराम: आगच्छति तदा अहं गच्छामि। |
| २. | तदा | जब | **तदा** श्रीकृष्ण: एकम् अश्वम् अपश्यत्। |
| ३. | अत्र | यहाँ | **अत्र** एक: बालक: अस्ति। |
| ४. | सर्वदा | सदा | अहं **सर्वदा** देवालयं गच्छामि। |
| ५. | एव | ही | जलम् **एव** जीवनम् अस्ति। |
| ६. | तत्र | वहाँ | स: **तत्र** पठति। |
| ७. | कदापि | कभी भी | विष्णु: **कदापि** असत्यं न वदति। |
| ८. | अद्य | आज | राधा **अद्य** फलं खादति। |
| ९. | अधुना | अब | **अधुना** अहं गच्छामि। |



www.rajteachers.com

| | | | |
|---|---|---|---|
| १०. | शनै: शनै: | धीरे-धीरे | स: **शनै: शनै:** कार्यं करोति। |
| ११. | इतस्तत: | इधर-उधर | नगरे **इतस्तत:** वाहनानि दृश्यन्ते। |
| १२. | कुत्र | कहाँ | बालक: **कुत्र** गच्छति। |
| १३. | सर्वत्र | सब जगह | **सर्वत्र** ईश्वर: अस्ति । |
| १४. | बहुधा | अनेकवार | रमेश: **बहुधा** संस्कृतं वदति। |
| १५. | सर्वथा | सब प्रकार से | **सर्वथा** राष्टहितं करणीयम्। |
| १६. | तूष्णीम् | चुप | सभागारे **तुष्णीं** भवतु। |
| १७. | निश्चयेन | निश्चय ही | अहं **निश्चयेन** कार्यक्रमे आगमिष्यामि। |
| १८. | अन्त: | अन्दर | स्यूतस्य **अन्त:** पुस्तकानि सन्ति। |
| १९. | बहि: | बाहर | रात्रौ सहसा गृहात् **बहि:** न गन्तव्यम्। |



www.rajteachers.com

तृतीयः पाठः
३

# ध्येयवाक्यानि
## ( आत्मनेपदम् )

संस्कृतसाहित्ये अनेकानि सुभाषितानि, सूक्तयश्च सन्ति। तेषु कानिचन वाक्यखण्डानि विविधसंस्थाः स्वप्रतीकचिह्नेषु ध्येयवाक्यरूपेण स्वीकृतवत्यः। न केवलं भारते, विदेशेषु अपि स्वराष्ट्रस्य विभागस्य वा प्रतीकचिह्ने संस्कृतस्य ध्येयवाक्यं स्वीकृतम्। अनेनैव संस्कृतस्य वैश्विकं महत्वं स्वयमेव सिद्ध्यति।

**ध्येयवाक्यानि – विभागाः**

१. **सत्यमेव जयते – भारतसर्वकारः**

भावार्थः – सत्यस्य एव विजयः भवति। एतद् अस्माकं देशस्य मूलमन्त्रः अस्ति । सत्यात् परं किमपि नास्ति। सत्यम् एव शाश्वतम्। अतः सत्यमेव जयते ।

२. **यतो धर्मस्ततो जयः – सर्वोच्चन्यायालयः**

भावार्थः – यत्र धर्मः तत्र विजयः भवति। अधर्मस्य सदा पराजयः एव भवति। यदि वयं धर्मपूर्वकम् अर्थात् न्यायपूर्वकम् कार्यं करवाम तर्हि अस्माकं विजयः निश्चितः इति।

३. **सत्यं शिवं सुन्दरम् – राष्ट्रियदूरदर्शनम्**

भावार्थः – सः परमात्मा सत्यस्वरूपः अस्ति स एव विश्वस्य कल्याणं करोति अतः सः परमदयालुः अस्ति। स एव सुन्दरः अस्ति। तस्मात् सुन्दरः अस्मिन् ब्रह्माण्डे कोऽपि नास्ति। अतः सत्यं शिवं सुन्दरम् प्रस्तौति अस्माकं दूरदर्शनम्।

४. **बहुजनहिताय बहुजनसुखाय– आकाशवाणी**

भावार्थः – बहुजनानां हिताय अर्थात् अस्माकं जीवनं सम्पूर्णसमाजस्य हिताय सुखाय च भवेत् वयं तस्य सुखस्य कृते सर्वदा प्रयत्नं कुर्मः इति भावः।

५. **धर्मचक्र प्रवर्तनाय – लोकसभा**

भावार्थः – शासकस्य दायित्वं भवति यत् सर्वान् मानवान् धर्मपूर्वकं पालयेत्। धर्मस्य अर्थः कर्तव्यम्। शासकः स्वयं कर्तव्यपालनं कुर्वन् स्वप्रजाम् अपि कर्तव्यपालने योजयेत्। तदर्थं धर्मचक्रप्रवर्तनाय अस्माकं लोकसभा।


www.rajteachers.com

६. **योगक्षेमं वहाम्यहम्** - **भारतीयजीवनबीमानिगमः**

भावार्थः - योगः अर्थात् अप्राप्तवस्तुनः प्राप्तिः। क्षेमः अर्थात् प्राप्तवस्तुनः संरक्षणम्। इत्थम् अप्राप्तवस्तूनि वयं प्राप्नुयाम प्राप्तवस्तूनि च रक्षेम।

७. **आदित्यात् जायते वृष्टिः** - **भारतीयमौसमविभागः**

भावार्थः - यदा सूर्यः तपति तदा समुद्रेषु अवस्थितं जलं वाष्परूपेण गगने गच्छति। तेनैव मेघानां निर्माणं भवति। मेघाः जलं वर्षन्ति। अतः एवोच्यते आदित्यात् जायते वृष्टिः।

८. **नभः स्पृशं दीप्तम्** - **भारतीयवायुसेना**

भावार्थः - प्रकाशितस्य आकाशस्य स्पर्शनम्। अर्थात् अस्माकं गतिः न केवलं भूमण्डले अपितु गगनमण्डलेऽपि निर्बाधरूपेण भवेत् वयं नभसि अवस्थितान् शत्रून् हत्वा जयामहे।

९. **शन्नो वरुणः** - **भारतीयजलसेना**

भावार्थः - जलाधिपतिः वरुणः अस्माकं कल्याणं विदधातु। समुद्रसन्तरणे का अपि बाधा न आगच्छेत्। तत्रापि अस्माकं मङ्गलं भवेत्।

१०. **शरीरमाद्यं खलुधर्मसाधनम्** - **अखिलभारतीय आयुर्विज्ञानसंस्थानम्**

भावार्थः - धर्मसाधनस्य प्रथमं सोपानम् अस्ति अस्माकं शरीरम्। कायः विना वयं किम् अपि साधयितुं समर्थाः न। अतः यत्नेन शरीरस्य संरक्षणं करणीयम्।

११. **असतो मा सद्गमय** - **केन्द्रीयमाध्यमिकशिक्षाबोर्ड**

भावार्थः - ईश्वरं निवेदयामि यत् सः माम् असत्यात् सत्यं प्रति नयेत्। अर्थात् वयं कदापि सन्मार्गं विहाय अन्यत्र न विचरेम।

१२. **विद्ययाऽमृतमश्नुते** - **राष्ट्रियशैक्षिक अनुसन्धानम् एवं प्रशिक्षण परिषद् ( NCERT )**

भावार्थः - विद्यया अर्थात् ज्ञानेन अमरतायाः प्राप्तिः भवति। शरीरे विनष्टे सति यशः शाश्वत् भवति। विद्यया मानवः यशः प्राप्नोति। अत एव उच्यते विद्ययाऽमृतमश्नुते।

१३. **उद्बुध्यध्वं समनसः सखायः** - **राज्यशैक्षिक अनुसन्धानम् एवं प्रशिक्षणसंस्थानम् ( SIERT )**

भावार्थः - समानमनसः हे मित्राणि! भवन्तः जागरुकाः भवन्तु। अर्थात् सज्जनशक्तिः एकीभूय जागृयात्।


www.rajteachers.com

**१४. सिद्धिर्भवतिकर्मजा - माध्यमिकशिक्षाबोर्डराजस्थानम्**

भावार्थ: - कर्मणा एव कार्यसिद्धि: भवति। अत: वयं सर्वदा स्वकार्ये प्रवृत्ता: भवेम।

**१५. शुभास्ते पन्थान: सन्तु - राजस्थानराज्यपथपरिवहननिगम:**

भावार्थ: - भवन्त: पथ: मङ्गलमय: भूयात्। मार्गे का अपि बाधा न आगच्छेत्।

**१६. कला संस्कृति: रक्षणम् - सिङ्गापुर इण्डियन फाईन आर्ट्स सोसाइटी ( सिङ्गापुरम् )**

भावार्थ: - कला संस्कृतिश्च रक्षणीया भवति। कला संस्कृतिश्च कस्यापि राष्ट्रस्य मूलाधारा भवति । अत: एते रक्षणीये।

**१७. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी - नेपालदेश: ( राष्ट्रिय आदर्शवाक्यम् )**

भावार्थ: - माता मातृभूमिश्च स्वर्गाद् अपि महीयसी भवति। अत: अस्माभि: मातृसम्मानं सेवनं च करणीयम्। सहैव मातृभूमे: रक्षणमपि करणीयम्।

**१८. सर्वस्य लोचनं शास्त्रम् - पेराडेनिया विश्वविद्यालय: श्रीलङ्का**

भावार्थ: - सामान्यनेत्राभ्याम् सर्वे केवलं प्रत्यक्षं पदार्थम् एव पश्यन्ति। किन्तु परोक्षं पदार्थं सामान्यनेत्राभ्यां कोऽपि द्रष्टुं न शक्नोति। तत्र शास्त्रद्वारा मानव: उचितानुचितं स्वविवेकेन सर्वं द्रष्टुं समर्थ: भवति। अत: एवोक्तं सर्वस्य लोचनं शास्त्रम्।

**१९. जलेष्वेव जयामहे - इण्डोनेशियन् जलसेना**

भावार्थ: - जलेषु अस्माकं विजय: भवेत्। केवलं नभसि स्थले न अपितु महासागरे अपि वयं अस्माकं शत्रून् हत्वा विजयं प्राप्नुम: ।

**२०. वयं रक्षाम: - भारतीय तटरक्षक:**

भावार्थ: - अत्र रक्षाया: भाव: उद्घोषित:। वयं सर्वे मिलित्वा देशस्य रक्षणकार्यं करवाम:।



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| जयते | विजयं प्राप्नोति | विजय प्राप्त करता है |
| यतो | यत्र | जहाँ |
| योगक्षेमं | अप्राप्तेः प्राप्तिः योगः | अप्राप्त वस्तु की प्राप्ति योग |
| | प्राप्तेः रक्षा क्षेमः तं | प्राप्त वस्तु की रक्षा क्षेम है। |
| आदित्यात् | सूर्यात् | सूर्य से |
| दीप्तम् | प्रकाशितम् | प्रकाशित |
| प्रवर्तनाय | क्रियाशीलाय | लागू करने के लिए |
| उद्बुध्यध्वं | जागरय | जागो सचेत हो |
| समनसः | समानमनोयुक्ताः | एक जैसे मन वाले |
| सखायः | मित्राणि | मित्र |
| सन्तु | भवन्तु | होवे |
| लोचनम् | नेत्रम् | आँख |
| शं | कल्याणं | कल्याण को |
| नो | अस्माकं | हमारी |
| गरीयसी | श्रेष्ठा | श्रेष्ठ, बढ़कर |
| शरीरमाद्यम् | तनुः प्रथमम् | शरीर ही पहला |
| जलेष्वेव | नीरेषु एव | अपार जल राशि में भी |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां पदानाम् उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| स्पृशं | दीप्तम् | वहाम्यहम् | अहर्निशं |
| प्रवर्तनाय | समनसः | शुभास्ते | जलेष्वेव |



www.rajteachers.com

**२. एकपदेन उत्तरत -**

(क) किं जयते ?

(ख) कस्मात् वृष्टिः जायते ?

(ग) शं नो वरुणः कस्य ध्येयवाक्यम् ?

(घ) सिद्धिः केन भवति ?

(ङ) 'सत्यं शिवं सुन्दरम्' कस्य ध्येयवाक्यम् अस्ति ?

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) सर्वस्य लोचनम् किम् ?

(ख) "धर्मचक्रप्रवर्तनाय" कस्य विभागस्य ध्येयवाक्यम् ?

(ग) नो शं कः कुर्यात् ?

(घ) राष्ट्रियदूरदर्शनस्य ध्येयवाक्यं किम् ?

(ङ) आद्यं धर्मसाधनं किम् ?

**२. अधोलिखितानां प्रश्ननानाम् उत्तराणि एक वाक्येन लिखत -**

(क) वयं कुत्र जयामहे ?

(ख) विद्यया किम् अश्नुते ?

(ग) स्वर्गादपि का गरीयसी ?

(घ) किं वहाम्यहम् ?

(ङ) कः स्पृशं दीप्तम् ?

**३. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत -**

(क) यतो धर्मस्ततो जयः।

(ख) सर्वस्य लोचनं शास्त्रम्।

(ग) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

(घ) विद्यया अमृतम् अश्नुते।

(ङ) सिद्धिर्भवति कर्मजा।

(च) सर्वस्य लोचनं शास्त्रम्।

(छ) आदित्याद् जयते वृष्टिः।



www.rajteachers.com

**४. मञ्जूषातः पदानि चित्वा अधोलिखितानि रिक्तस्थानानि पूरयत -**

| समनसः, संस्कृतिः, मा सद्, जयामहे, हिताय बहुजन |
|---|

(क) बहुजन.............................. सुखाय ।

(ख) कला.............................. रक्षणम् ।

(ग) जलेष्वेव.............................. ।

(घ) असतो.............................. गमय।

(ङ) उद्बुध्यध्वं .............................. सखायः।

**५. सुमेलनं कुरुत -**

(क) धर्मचक्रप्रवर्तनाय - पेराडेनिया विश्वविद्यालय श्रीलङ्का

(ख) सत्यं शिवं सुन्दरम् - भारतीयमौसमविभागः

(ग) सर्वस्य लोचनं शास्त्रम् - राजस्थान राज्य पथ परिवहन निगमः

(घ) आदित्यात् जयते वृष्टिः - लोकसभा

(ङ) शुभास्ते पन्थानः सन्तु - राष्ट्रियदूरदर्शनम्

**६. अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत**

(क) धर्मस्ततः .............................. + ..............................

(ख) वहाम्यहम् .............................. + ..............................

(ग) सिद्धिर्भवति.............................. + ..............................

(घ) शुभास्ते .............................. + ..............................

(ङ) जलेष्वेव .............................. + ..............................

## योग्यता-विस्तारः

### ( अ ) भाषाक्रीडा

(क) शिक्षकः छात्राणाम् एकं मण्डलं निर्माय मध्ये स्थित्वा एकं ध्येयवाक्यं वदेत्। छात्राः क्रमशः तस्य विभागस्य नाम वदेयुः। यः न वदति अलीकं अनुचितं वा वदति सः मण्डलात् बहिः भवति। अनेनैव शिक्षकः कस्यापि विभागस्य नाम वदेत् छात्राः तथैव तस्य विभागस्य ध्येयवाक्यं वदेयुः। अन्ते यः शिष्टः सः विजेता भवति।



www.rajteachers.com

(ख) शिक्षकः छात्राणां दलद्वयं दलत्रयं वा निर्माय प्रश्नोत्तरकार्यक्रमं कुर्यात्। प्रत्येकदलस्य नामकरणं कृत्वा (यथा-पाणिनिदलं, व्यासदलं, वाल्मीकिदलं, शिवाजिदलं, प्रतापदलं च) प्रत्येकं दलम् एकम् एकं प्रश्नं पृच्छेत्। उत्तरदानस्य समयसीमा एकनिमेषः भवेत्। तस्मात् यदि कोऽपि सम्यक् उत्तरं ददाति, तदा तस्य दलस्य कृते अङ्कत्रयम्। यदि तस्मात् दलात् उत्तरं न आगच्छति तदा तस्य प्रश्नस्य अङ्कं शून्यं दद्यात्। अनन्तरं प्रश्नः अग्रिमे दले गच्छेत्। यदि ते तस्य एव प्रश्नस्य उत्तरं सम्यक् ददति तर्हि तेषां कृते एकम् अङ्कं अतिरिक्तरूपेण दद्यात्। ततः द्वितीयदलस्य कृते मूलप्रश्नः आगच्छेत्। अत्र सर्वेप्रश्नाः ध्येयवाक्येषु एव भवेयुः। अन्ते यः दलः सर्वाधिकाङ्कान् अर्जयति सः विजेता भवति।

### ( आ ) अन्येऽपि प्रसिद्धानि ध्येयवाक्यानि पठत -

| | ध्येयवाक्यम् | | विभागः |
|---|---|---|---|
| (क) | अतिथिः देवो भव | - | भारतीयपर्यटनविभागः |
| (ख) | श्रम एव जयते | - | श्रमविभागः |
| (ग) | योगः कर्मसु कौशलम् | - | भारतीय औद्योगिकसंस्थानम् खड्गपुरम् |
| (घ) | कर्मण्येवाधिकारस्ते मा फलेषु कदाचन | - | इण्डोनेशियन् वायुसेना |
| (ङ) | सा विद्या या विमुक्तये | - | विद्याभारती |
| (च) | वीरभोग्या वसुन्धरा | - | भारतीयस्थलसेना (राजपुताना) |
| (छ) | बुद्धिः सर्वत्र भ्राजते | - | कोलम्बो विश्वविद्यालयः श्रीलङ्का |
| (ज) | योगस्थः कुरु कर्माणि | - | कुरूक्षेत्र विश्वविद्यालयः हरियाणा |
| (झ) | योऽनूचानः स नो महान् | - | राष्ट्रियसंस्कृतसंस्थानम्, नव देहली |
| (ञ) | धर्मो विश्वस्य जगतः प्रतिष्ठा | - | राजस्थानविश्वविद्यालयः,जयपुरम् |
| (ट) | धर्मो रक्षति रक्षितः | - | अनुसन्धान एवं विश्लेषण विभागः |
| (ठ) | श्रद्धावाँल्लभते ज्ञानम् | - | महर्षिदयानन्दसरस्वतीविश्वविद्यालयः अजयमेरु |
| (ड) | मानकः पथप्रदर्शकः | - | भारतीयमानकविभागः |
| (ढ) | कृण्वन्तो विश्वमार्यम् | - | आर्यसमाजः |


। छात्राः स्वयमेव एतादृशानां ध्येयवाक्यानां सङ्ग्रहणं कुर्युः ।



www.rajteachers.com

चतुर्थः पाठः ४

# वीराङ्गना हाडीरानी



चूण्डावतसर्वदारस्य रावतरत्नसिंहस्य विवाहः हाडावती राजकुमार्या सह अभवत्। तस्य विवाहस्य द्वितीये तृतीये वा दिवसे महाराणाराजसिंहस्य सन्देशः आगतः यत् शीघ्रमेव अवरङ्गजेबेन सह युद्धं करणीयम्। इति विज्ञाय रावतरत्नसिंहस्य मनः दोलायमानम् अभवत्। एकतः राज्ञीं प्रति अनुरक्तिः अपरतश्च क्षत्रियधर्मः। अन्ततः क्षत्रियधर्मं पालयन् युद्धाय निश्चयः कृतः। राज्ञी अपि स्वपतिं तिलकं कृत्वा रक्षासूत्रं बद्ध्वा आरार्तिकम् अवतारयत्।

शिरसि उष्णीषं परिधाय शस्त्राणि गृहीत्वा अश्वमारुह्य रावतरत्नसिंहः युद्धाय प्रयाणम् अकरोत्, किन्तु तस्य मनः प्रियायामेव अनुरक्तः आसीत्। रणक्षेत्रं प्रति गच्छन् सः वारं वारं राजप्रासादे अट्टालिकायां स्थितां राज्ञीं पश्यति स्म। राज्ञी अपि निर्निमेषं तम् अवलोकितवती। किङ्कर्तव्यविमूढं नृपं दृष्ट्वा सा अपि मनसि व्याकुला आसीत्।

मोहपाशे आबद्धः सः सेवकम् आहूय प्राह – "प्रासादं गत्वा महाराज्ञीं कथय यत् भवती किमपि अभिज्ञानचिह्नं ददातु। यं धारयित्वा युद्धे त्वां समीपं मत्वा आनन्देन युद्धं करिष्यामीति" सेवकः महाराज्ञीं सन्देशं श्रावितवान्।

महाराज्ञी स्वमनसि अचिन्तयत् यत् चुण्डावतस्य मनः मयि अनुरक्तः अस्ति। मोहवशात् सः सम्यक्



www.rajteachers.com

युद्धं न करिष्यति तर्हि कथं जेष्यति? यदि अहं जीविता न भविष्यामि तर्हि सः सुखेन युद्धं करिष्यति। वीराङ्गनायाः कृते एषः अनुकूलः अवसरः सौभाग्यश्च। इति विचार्य सा सेवकम् आह "सेवक! स्थालीमानय। अपि च अभिज्ञानचिह्नं नय।" इति उक्त्वा सा खड्गमादाय स्वशिरच्छेदं कृत्वा स्थालीमध्ये अपातयत्। हतप्रभः सेवकः तां स्थालीं वस्त्रावृत्तं कृत्वा रत्नसिंहं प्रति नीतवान्। "गृह्णातु महाराज! इदम् अभिज्ञानचिह्नम्" इति उक्त्वा वाष्पकुलेक्षणः सेवकः रोदितुं प्रारभत्।

वस्त्रम् अपावृत्य तं दृष्टवा आश्चर्यचकितः रत्नसिंहः – "हा! हाडी! त्वया किं कृतम्। मोहग्रस्तं मां सम्यक्तया बोधितवती। अहं मुण्डमाली भूत्वा साक्षात् महाकाल इव शत्रूणां कदनं करिष्यामि। आततायिनः एतादृशं बोधं कारयिष्यामि यत् ते सप्तजन्मनि अपि न विस्मरिष्यन्ति। लप्स्यन्ते ते धूर्ततायाः फलम्।"



ततः रावतरत्नसिंहः स्वपत्न्याः मुण्डस्य शिरस्थकचान् भागद्वयं विधाय निजगले धृत्वा युद्धं कृतवान्। अवरङ्गजेबस्य सेना ईदृशं युद्धं कुर्वन्तं रावतरत्नसिंहं दृष्ट्वा साक्षात् महाकालं मत्वा हाहाकारं कुर्वन् पलायनम् अकरोत्।


www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| प्रेषयति | प्रेषणं करोति | भेजता है |
| परित्रायस्व | रक्षस्व | रक्षा करो |
| परिणीतवान् | विवाहितवान् | विवाह किया |
| आरार्तिकम् | निराजनम् | आरती |
| अभिज्ञानम् | सूचक चिह्नम् | निशानी |
| सर्वदारस्य | प्रमुखस्य | सरदार का |
| वाष्पकुलेक्षणः | साश्रुनेत्रयोः | आँसू से पूर्ण नेत्र वाला |
| कदनम् | मर्दनम् | संहार |
| शिरस्थकचान् | मस्तकस्य केशान् | शिर के बालों को |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

| | | | | |
|---|---|---|---|---|
| अवरङ्गजेबः | ग्रहीतुम् | परिणीतवान् | युद्धार्थं | मुक्तिप्राप्तये |
| महाराज्ञी | गृह्णातु | वाष्पकुलेक्षणः | विस्मरिष्यन्ति | |

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) रावतरत्नसिंहः कस्य सन्देशं प्राप्तवान् ?
(ख) राज्ञी कस्य आरार्तिकम् अवतारितवती ?
(ग) रावतरत्नसिंहः शिरसि किं धारयति ?
(घ) कस्मात् कारणात् रावतरत्नसिंहः सम्यक् युद्धं न करिष्यति ?
(ङ) रावतरत्नसिंहः सेवकं किम् आनेतुं प्रेषितवान् ?

### लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानां उत्तराणि एकपदेन लिखत –**

(क) रावतरत्नसिंहस्य विवाहः कया सह अभवत् ?
(ख) हाडीरानीं प्रति कः अनुरक्तः आसीत् ?
(ग) सेवकं प्रति रत्नसिंहः किं प्राह ?
(घ) "सेवक! स्थालीमानीय" इति का कथयति ?
(ङ) राज्ञी निर्निमेषं कम् अवलोकितवती ?


www.rajteachers.com

२. अधोलिखितानां प्रश्नानां उत्तराणि एकवाक्येन लिखत-

(क) रावतरत्नसिंहः कं पालयन् युद्धाय निश्चयः कृतः ?

(ख) रावतरत्नसिंहस्य युद्धार्थं गमनकाले किम् अवतारितवती ?

(ग) राज्ञी मनसि किं चिन्तितवती ?

(घ) मोहपाशे कः आबद्धः आसीत् ?

(ङ) कीदृशः रावतरत्नसिंहः युद्धं कृतवान् ?

३. मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत-

| रत्नसिंहः, निर्निमेषं, राज्ञीं, मोहग्रस्तं, महाकाल इव, स्कन्धे |
|---|

(क) एकतः .................................... प्रति अनुरक्तिः।

(ख) रावतरत्नसिंहः .................. शस्त्राणि धारयित्वा प्राचलत्।

(ग) राज्ञी अपि ............................. तम् अवलोकितवती।

(घ) .................................... मां सम्यक्तया बोधितवती।

(ङ) साक्षात् ............................ शत्रूणां कदनं करिष्यामि।

४. रिक्तस्थानानि पूरयत-

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | .......... | लभन्ते |
| मध्यमपुरुषः | .......... | लभेथे | .......... |
| उत्तमपुरुषः | लभे | .......... | .......... |

५. निम्नलिखितपदेषु उपसर्गान् पृथक करुत -

यथा - प्रेषयति = प्र + ईषयति

(क) आगच्छ = ................ + ...............

(ख) परित्रायस्व = ................ + ...............

(ग) अनुरक्तः = ................ + ...............

(घ) महारावतः = ................ + ...............

(ङ) प्रबलः = ................ + ...............

(च) विस्मरिष्यन्ति = ................ + ...............



www.rajteachers.com

## योग्यता-विस्तारः

एवमेव विभिन्नानां वीराङ्गनानां यथा पद्मिनी, कर्मवती, करुणावती, दुर्गावती, लक्ष्मीबाई प्रभृतीनाम् चित्रसङ्ग्रहं कृत्वा तेषां विवरणं सङ्गृह्णन्तु।

### सेव्-धातु लट्लकार ( वर्तमान काल )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुषः | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुषः | सेवे | सेवावहे | सेवामहे |

### सेव् ( सेवा करना ) धातु लृट् लकार ( भविष्यत् काल )


| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे |


www.rajteachers.com

पञ्चमः पाठः
५

# गीतामृतम्

## ( विसर्ग-सन्धिः )



कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।१ ।।

क्रोधाद् भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।२ ।।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।३ ।।

यदा यदा हि धर्मस्य, ग्लानिर्भवति भारत!
अभ्युत्थानमधर्मस्य, तदात्मानं सृजाम्यहम् ।।४ ।।

परित्राणाय साधूनां, विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय, सम्भवामि युगे युगे ।।५।।



www.rajteachers.com

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।।६।।

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुपत्वं मार्दवः ह्रीरचापलम् ।।७ ।।

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं देवीमभिजातस्य भारत! ।।८।।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।९।।

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ।।१०।।

## पदच्छेदः

| | | |
|---|---|---|
| कर्मण्येवाधिकारस्ते | = | कर्मणि + एव + अधिकारः + ते |
| कर्मफलहेतुर्भूः | = | कर्मफलहेतुः + भूः |
| सङ्गोऽस्त्वकर्मणि | = | सङ्गः + अस्तु + अकर्मणि |
| यद्यदाचरति | = | यत् + यत् + आचरति |
| यत्प्रमाणम् | = | यत् + प्रमाणम् |
| लोकस्तदनुवर्तते | = | लोकः + तत् + अनुवर्तते |
| ग्लानिर्भवति | = | ग्लानिः + भवति |
| अभ्युत्थानमधर्मस्य | = | अभि + उत्थानम् + अधर्मस्य |
| तदात्मानं | = | तदा + आत्मानं |
| सृजाम्यहम् | = | सृजामि + अहम् |
| धर्मसंस्थापनार्थाय | = | धर्मसंस्थापन + अर्थाय |
| श्रद्धावाँल्लभते | = | श्रद्धावान् + लभते |
| संयतेन्द्रियः | = | संयत + इन्द्रियः |
| शान्तिमचिरेणाधिगच्छति | = | शान्तिम् + अचिरेण + अधिगच्छति |


www.rajteachers.com

| | | |
|---|---|---|
| सत्यमक्रोधस्त्यागः | = | सत्यम् + अक्रोधः + त्यागः |
| शान्तिरपैशुनम् | = | शान्तिः + अपैशुनम् |
| भूतेष्वलोलुपत्वं | = | भूतेषु + अलोलुपत्वं |
| ह्रीरचापलम् | = | ह्रीः+अचापलम् |
| शौचमद्रोहोनातिमानिता | = | शौचम् + अद्रोहः + न + अतिमानिता |
| दैवीमभिजातस्य | = | दैवीम् + अभिजातस्य |
| अनुद्वेगकरम् | = | अन् + उद्वेगकरम् |
| स्वाध्यायाभ्यसनं | = | स्वाध्याय + अभ्यसनं |
| चैव | = | च + एव |
| मौनमात्मविनिग्रहः | = | मौनम् + आत्मविनिग्रहः |
| भावसंशुद्धिरित्येतत्तपो | = | भावसंशुद्धिः + इति + एतत् + तपो |
| मानसमुच्यते | = | मानसम् + उच्यते |

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| हेतुः | कारणम् | कारण |
| सम्मोहः | मूढता | मूर्खता |
| विभ्रमः | भ्रान्तिः | भटकाव |
| ग्लानिः | हानिः | हानि |
| अभ्युत्थानमधर्मस्य | अधर्मस्य विकासम् | अधर्म का बढ़ना |
| परित्राणाय | रक्षणाय | रक्षा करने के लिए |
| आत्मानम् | स्वयमेव | अपने आपको |
| संयतेन्द्रियः | संयतानि इन्द्रियाणि यस्य सः | इन्द्रियों को वश में रखने वाला |
| अपैशुनम् | न पैशुनम् | चुगली न करना |
| मार्दवं | मृदुता | कोमलता |
| ह्रीः | लज्जा | लज्जा |
| अचापलम् | स्थिरता | चंचलता का अभाव |



www.rajteachers.com

| | | |
|---|---|---|
| धृतिः | धैर्यम् | धीरज |
| दैवीम् | अलौकिकम् | अलौकिक |
| अभिजातस्य | कुलीनस्य | उच्च कुलोत्पन्न पुरुष के |
| अनुद्वेगकरं | येन क्रोधं न जायते | क्रोध पैदा नहीं करने वाले |
| वाङ्मयं | वाग्युक्तम् | वाणी का |
| मनः प्रसादः | हर्षः | मन की प्रसन्नता |
| सौम्यत्वं | सारल्यम् | सरलता |
| आत्मविनिग्रहः | आत्मसंयमः | स्वयं संयम करना |
| भावसंशुद्धि | भावनाशुद्धि | भावनाओं की शुद्धता |

## अभ्यासः

### मौखिकप्रश्नाः

१. **उच्चारणं कुरुत -**

| | | | |
|---|---|---|---|
| परित्राणाय | क्रोधात् | भ्रंशाद् | विभ्रमः |
| बुद्धिनाशो | यद्यदाचरित | श्रेष्ठः | सृजाम्यहम् |
| सङ्गोऽस्त्वकर्मणि | विद्यते | श्रद्धावाँल्लभते | पैशुनम् |
| ह्रीः | धृतिः | वाङ्मयम् | संशुद्धिः। |

२. **एकपदेन उत्तरं वदत -**

(क) क्रोधाद् किं भवति ?

(ख) ज्ञानं कः लभते ?

(ग) अस्माकं अधिकारः कुत्र अस्ति ?

(घ) केषां परित्राणाय ईश्वरः सम्भवति ?



www.rajteachers.com

## लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) परमात्मा आत्मानं कदा सृजति ?

(ख) वाङ्मयः तपः किम् अस्ति ?

(ग) मौनं कीदृशं तपः उच्यते ?

(घ) कः लभते ज्ञानम् ?

२. **उचितपदप्रयोगेण रिक्तस्थानानि पूरयत -**

(क) ते अधिकारः अस्ति ...................... । (कर्मणि/अकर्मणि)

(ख) ईश्वरः साधूनां ...................... युगे युगे सम्भवति। (विनाशाय/परित्राणाय)

(ग) .......................... भवति सम्मोहः। (श्रद्धया/क्रोधात्)

(घ) यद्यदाचरति ............................ तत्तदेवेतरो जनः। (कनिष्ठ/श्रेष्ठः)

३. **रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत -**

**उदाहरणम्** - <u>कर्मणि</u> एव ते अधिकारः।

प्रश्नः - कस्मिन्नेव ते अधिकारः ?

(क) <u>क्रोधाद्</u> भवति सम्मोहः।

(ख) यद्यदाचरति <u>श्रेष्ठः</u> जनः लोकः तदनुवर्तते।

(ग) <u>धर्मस्य</u> ग्लानिर्भवति।

(घ) न हि <u>ज्ञानेन</u> सदृशं पवित्रम् ।

(ङ) मनः प्रसादः <u>सौम्यत्वं तयोः</u> मानसमुच्यते।

४. **'क' खण्डं 'ख' खण्डेन सह उचितेन पदेन योजयत् -**

| 'क' खण्डम् | | 'ख' खण्डम् |
|---|---|---|
| (क) परित्राणाय | - | सदृशं पवित्रम् |
| (ख) न हि ज्ञानेन | - | ज्ञानम् |
| (ग) श्रद्धावाँल्लभते | - | साधूनाम् |
| (घ) मनः प्रसादः सौम्यत्वं | - | मानसमुच्यते |
| (ङ) भावसंसिद्धिरित्येत्तपो | - | मौनमात्मविनिग्रहः |
| (च) क्रोधात् भवति | - | सम्भवामि युगे युगे |
| (छ) धर्मसंस्थापनार्थाय | - | सम्मोहः |



www.rajteachers.com

**५. निम्नाङ्कितपदेषु सन्धिविच्छेदं कुरुत -**

(क) कर्मण्येव = ...................... + .....................

(ख) क्रोधाद् भवति = ...................... + .....................

(ग) ग्लानिर्भवति = ...................... + .....................

(घ) अचिरेणाधिगच्छति = ...................... + .....................

(ङ) शान्तिरपैशुनम् = ...................... + .....................

**६. अधोलिखितपदेषु शब्दं विभक्तिवचनं च लिखत -**

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) साधूनाम् | ............. | ............ | ............ |
| (ख) फलेषु | ............. | ............ | ............ |
| (ग) विनाशाय | ............. | ............ | ............ |
| (घ) ज्ञानेन | ............. | ............ | ............ |
| (ङ) युगे | ............. | ............ | ............ |
| (च) अहिंसा | ............. | ............ | ............ |
| (छ) परित्राणाय | ............. | ............ | ............ |

## योग्यता-विस्तारः

**(क) पाठपरिचयः -**

भारतीयसंस्कृतेः प्रसिद्धौ द्वौ उपजीव्यकाव्यग्रन्थौ स्तः - 1. रामायणम् 2 महाभारतं च। श्रीमद्भगवद् गीता महाभारतस्य भीष्मपर्वणः अंशोऽस्ति। अस्मिन् ग्रन्थे श्रीकृष्णस्य कर्त्तव्यविमूढाय अर्जुनाय प्रदत्ताः दिव्यसन्देशाः सन्ति। ग्रन्थोऽयम् न केवलं अर्जुनाय अपितु मानवमात्राय कल्याणकारी अस्ति। गीतायाम् अष्टादश अध्यायाः सप्तशतकाः श्लोकाः सन्ति।



www.rajteachers.com

## ( ख ) भाषाविस्तारः

### विसर्ग-सन्धिः

१. **विसर्गस्य पश्चात् 'च' अथवा 'छ' भवति तदा विसर्गस्य स्थाने 'श्' आदेश भवति।**

**यथा -**

| | | | | | |
|---|---|---|---|---|---|
| रामः | + | चलति | = | रामश्चलति | ( विसर्गस्य श् आदेशः ) |
| निः | + | छल | = | निश्छलः | ( विसर्गस्य श् आदेशः ) |

२. **विसर्गस्य पश्चात् 'त्' अथवा 'थ्' वर्णः भवति तदा विसर्गस्य स्थाने 'स' वर्णः भवति ।**

**यथा -**

| | | | | | |
|---|---|---|---|---|---|
| यशः | + | तनोति | = | यशस्तनोति | ( विसर्गस्य स् आदेशः ) |
| नमः | + | ते | = | नमस्ते | ( विसर्गस्य स् आदेशः ) |

३. **अकारस्य परे विसर्गः भवति विसर्गस्य परे पुनः अकारः भवति तदा पूर्वस्य अकारविसर्गस्य च स्थाने 'ओ' भवति तथा परे स्थितस्य अकारस्य स्थाने 'ऽ' ( अवग्रहः ) भवति।**

**यथा -**

| | | | | | |
|---|---|---|---|---|---|
| सः | + | अपि | = | सोऽपि | ( विसर्गस्यस्थाने 'ओ' एवं अ स्थाने ऽ ) |
| कः | + | अयम् | = | कोऽयम् | ( विसर्गस्यस्थाने 'ओ' एवं अ स्थाने ऽ ) |

४. **विसर्गस्यपूर्वं 'अ' एवं विसर्गस्य पश्चात् अन्य स्वरः भवति तदा विसर्गस्य लोपः भवति।**

**यथा -**

| | | | | | |
|---|---|---|---|---|---|
| रामः | + | आगतः | = | राम आगतः | ( विसर्गस्य लोपः ) |
| सूर्यः | + | उदेति | = | सूर्य उदेति | ( विसर्गस्य लोपः ) |

५. **विसर्गस्य पूर्व 'अ' एवं पश्चात् वर्गस्य तृतीयः, चतुर्थः, पञ्चमः वर्ण च भवति, तदा 'अ' एवं विसर्गस्य स्थाने 'ओ' भवति।**

**यथा -**

| | | | | | |
|---|---|---|---|---|---|
| पयः | + | धरः | = | पयोधरः | ( अ एवं विसर्गस्य आदेशः = ओ ) |
| पुरः | + | हितः | = | पुरोहितः | ( अ एवं विसर्गस्य आदेशः = ओ ) |



www.rajteachers.com

षष्ठः पाठः ६

# प्राचीन-भारतीय-वैज्ञानिकाः

(एकस्मिन् विद्यालये आचार्य–छात्राणां मध्ये वैज्ञानिकानां विषये वार्तालापः प्रचलति ।)

**आचार्यः** – पाइथागोरसतः पञ्चदशशतात् वर्षपूर्वम् आचार्यः बोधायनः शुल्बसूत्रे एतस्य प्रमेयस्य प्रयोगं कृतवान्। भारतीयाः अङ्काः अपि ततः पूर्वम् आसन्।

**हेमन्तः** – महोदय! अपि प्राचीनकाले भारतदेशे वैज्ञानिकाः आसन्?

**आचार्यः** – भारतदेशः वैदिककालात् एव वैज्ञानिकानां देशः अस्ति। चिकित्सा–अभियान्त्रिकी–गणित– विज्ञानादिषु क्षेत्रेषु भारतीय–वैज्ञानिकाः बहुः कार्यं कृतवन्तः।

**जया** – महोदय! वनस्पतिविज्ञानविषये किं कार्यं भारते अभवत्?


**आचार्यः** – महर्षिः पराशरः 'वृक्षायुर्वेदः' ग्रन्थे वनस्पतीनां वर्गीकरणं कृतवान्। वृक्षेषु प्रकाश–निस्तारण–क्रियायाः (प्रकाशसंश्लेषणम्) पर्णस्य अवान्तर–भागानाम् (प्लाजमा–इत्यादीनाम्) अपि वर्णनं पराशरः कृतवान्।

**कृष्णः** – अपि प्राचीनकाले विद्युत्कोशः (बैट्री) अपि आसीत् किम्?

**आचार्यः** – अवश्यमेव आसीत्। ताम्रपत्रं यशदपत्रपत्रं कृष्णाङ्गारचूर्णं पारद–इत्यादीनां संयोगेन विद्युद् उत्पन्ना भवति इति महर्षिः अगस्त्यः लिखितवान्।

**चेतनः** – महोदय! वदतु कृपया, अस्माकं भारते गणितविषये अन्यत् किं प्रमुखं कार्यम् अभवत् ?


**आचार्यः** – प्राचीनः भारतीयः महान् गणितज्ञः आर्यभट्टः प्रकाशस्य गतिं सम्यक् जानाति स्म। पृथ्वीगोलाकारा अस्ति। पृथ्वी स्व अक्षे भ्रमति, तेन एव दिवारात्री भवतः। पृथ्वी सूर्यस्य परिक्रमां करोति, तेन एव षड् ऋतवः भवन्ति । सप्ताहे दिनानां क्रमः, प्रकाशस्य गतिः, कालगणना, खगोलविज्ञानं, त्रिकोणमिति इत्यादिषु क्षेत्रेषु आचार्यः आर्यभट्टः बहुकार्यं कृतवान् ।



**आदित्यः** – आचार्य! किं भास्करः अपि गणित–विषये कार्यं कृतवान्?



www.rajteachers.com



**आचार्यः** – आम्! गुरुत्वाकर्षणसिद्धान्तं (पै) इति गणित-चिह्नस्यामानं त्रैराशिक-नियमादीन् भास्कराचार्यः प्रतिपादितवान्।

**नीता** – महोदय ! चिकित्साक्षेत्रे अस्माकं पूर्वजानां ज्ञानं कीदृशम् आसीत् ?

**आचार्यः** – शल्यचिकित्सायाः जनकः आचार्यः सुश्रुतः प्रायशः सर्वाः शल्यक्रियाः करोति स्म। यथा – त्वचारोपणम् (प्लास्टिक सर्जरी), नासिकारोपणम् कर्णरोपणम् तन्त्रिकाचिकित्सा, नेत्रचिकित्सा इत्यादयः। शल्यक्रियायां यानि उपकरणानि सुश्रुतेन प्रयुक्तानि तानि एव उपकरणानि तथैव आधुनिक-चिकित्साक्षेत्रे प्रयुज्यन्ते ।



**भरतः** – आचार्य! चरकः अपि भैषजरसायनं, ज्वालापरीक्षणं, वनस्पति आधारिता च चिकित्सा पद्धतिं निर्दिष्टवान् ।

**गरिमा** – महोदय ! प्राचीनभारतीयवैज्ञानिकानां नामानि तेषाम् अविष्काराः च विस्तरेण कुत्र लभ्यन्ते।

**आचार्यः** – भारतस्य वैज्ञानिकपरम्परा सुदीर्घास्ति। तस्याः परिचयः संस्कृतस्य प्राचीनग्रन्थेषु प्राप्यते।

**नीता** – भारतीयचिकित्सापद्धत्याः कानि-कानि अङ्गानि सन्ति?

**आचार्यः** – भारतीयचिकित्सायाः अष्टौ अङ्गानि सन्ति।

**नीता** – एकस्मिन्नेव ग्रन्थे अष्टौ अङ्गानि केन निरूपितानि ?

**आचार्यः** – वाग्भट्टेन । असौ वाग्भट्टः रणस्तम्भपुरस्य (रणथम्भौरः) धीर-वीरः हम्मीरस्य पितामहः आसीत्।



**आदित्यः** – राजस्थानस्य खगोलशास्त्री, ज्योतिषाचार्यः कः आसीत्?

**आचार्यः** – ब्रह्मगुप्तः राजस्थानस्य खगोलशास्त्री, ज्योतिषाचार्यः च आसीत्। तस्य ग्रन्थस्य नाम ब्रह्मस्फुटसिद्धान्तः अस्ति। अस्मिन् ग्रन्थे सूर्यवेधस्य प्रक्रिया विधिवद् वर्णिता। चन्द्रसूर्ययोः ग्रहणस्य गणना अस्मिन् ग्रन्थे विस्तारेण उल्लेखितास्ति। ब्रह्मगुप्तेन ज्योतिषयन्त्रशालायाम् अनेकयन्त्राणाम् उल्लेखः कृतः।



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सम्प्रति | इदानीम् | आजकल |
| वर्गीकरणम् | निर्धारणम् | गुणों के आधार पर स्थान निर्धारण |
| अवान्तर | मध्येस्थितः | आन्तरिक |
| विद्युत्कोशः | विद्युत् सञ्चितभण्डारः | विद्युत् का सञ्चित भण्डार (बैट्री) |
| ताम्रम् | ताम्रम् इति धातु विशेषः | ताँबा |
| वर्तुलाकारा | गोलाकारः | गोलाकार |
| पै ($\pi$) | गणिते प्रयुक्तम् एकं चिह्नम् | गणित में प्रयुक्त एक चिह्न |
| त्वचारोपणम् | त्वचायाः आरोपणम् | त्वचा का प्रत्यारोपण |
| नासिकारोपणम् | नासिकायाः आरोपणम् | नासिका का आरोपण |
| कर्णरोपणम् | कर्णस्य आरोपणम् | कान को पुनः जोड़ना |
| शल्यक्रिया | त्वचम् उत्पाट्य चिकित्सा करणम् | चीरफाड़ कर चिकित्सा करना |
| भैषजरसायनम् | वृक्षाणां रसैः औषधनिर्माणम् | पेड़ पौधों के रस से औषधि निर्माण की प्रक्रिया |
| सुदीर्घा | अतिदीर्घा | लम्बी |
| प्रयुज्यमानानि | प्रयोगे आगतानि | प्रयोग में आने वाले |
| प्रकाशनिस्सारणक्रिया | प्रकाशसंश्लेषणस्य क्रिया | प्रकाश से संश्लेषण की क्रिया |
| विसङ्गतिः | असमानता | असमानता |
| यशदपत्रम् | जस्ता इति धातुविशेषः | जस्ते की छड़ |
| पारदः | पदार्थ विशेषः | पारा |
| कृष्णाङ्गारम् | अर्धदग्धकाष्टस्य खण्डविशेषः येन पुनः ऊर्जा मिलति | कोयला |


www.rajteachers.com

## अभ्यासः

### मौखिकप्रश्नाः

**१. निम्नलिखितानां शब्दानाम् उच्चारणं कुरुत -**

कृष्णाङ्गारचूर्णम् त्रिकोणमितिः भैषजरसायनम् सुदीर्घा

प्रयुज्यमानानि प्रयुज्यन्ते प्रकाशनिस्सारणक्रिया।

**२. अधोलिखितप्रश्नानाम् उत्तराणि वदत -**

(क) चिकित्साक्षेत्रे राजस्थानस्य प्राचीनः प्रसिद्धचिकित्सकः कः आसीत् ?

(ख) वाग्भट्टेन विरचितः ग्रन्थः कः अस्ति ?

(ग) राजस्थानस्य प्राचीनः ज्योतिषाचार्यः कः अस्ति ?

(घ) ब्रह्मगुप्तेन विरचितः ग्रन्थः कः ?

(ङ) ग्रहाणां गतिविषये कस्मिन् ग्रन्थे वर्णनम् अस्ति ?

### लिखितप्रश्नाः

**१. एकपदेन उत्तरं लिखत -**

(क) वृक्षायुर्वेदग्रन्थस्य रचयिता कः ?

(ख) शुल्वसूत्रं केन रचितम् ?

(ग) आर्यभट्टः किं जानाति स्म ?

(घ) शल्यक्रियायाः जनकः कः ?

(ङ) गुरुत्वाकर्षणसिद्धान्तं कः प्रतिपादितवान् ?

**२. अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत -**

(क) महर्षिः पराशरः वनस्पतीनां किं कृतवान् ?

(ख) विद्युत्कोशस्य आविष्कारकः कः आसीत् ?

(ग) ''पृथ्वी सूर्यस्य परिक्रमां करोति ''इति सिद्धान्तं कः प्रतिपादितवान् ?

(घ) भास्कराचार्यः किं प्रतिपादितवान् ?

(ङ) ''त्वचारोपणम्'' आदौ कः कृतवान् ?



www.rajteachers.com

**३. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) परमाणुवादस्य जनकः महर्षिः कणादः अस्ति।

(ख) विमानविद्यायाः वर्णनं भारद्वाजः अकरोत्।

(ग) भारतीकृष्णतीर्थः वैदिकगणितं रचितवान्।

(घ) महर्षिः पाणिनिः अष्टाध्यायीं रचितवान्।

**४. समुचितं मेलनं कुरुत -**

| | (अ) | (आ) |
|---|---|---|
| (क) | ब्रह्मगुप्तः | शल्यक्रिया |
| (ख) | आर्यभट्टः | ज्वालापरीक्षणम् |
| (ग) | बोधायनः | खगोलविज्ञानम् |
| (घ) | सुश्रुतः | बह्मस्फुट सिद्धान्तः |
| (ङ) | चरकः | शुल्वसूत्रम् |

**५. अधोलिखितानां प्रकृतिप्रत्यानां प्रयोगं कृत्वा नवशब्दानां निर्माणं कुरुत -**

| | धातुः | क्त | क्तवतु |
|---|---|---|---|
| उदाहरणम्- | कृ | कृतः | कृतवान् |
| | लिख् | .......... | ......... |
| | गम् | .......... | ......... |
| | पठ् | .......... | ......... |
| | हस् | .......... | ......... |
| | नि + दृश् | .......... | ......... |

**६. मञ्जूषातः चित्वा रिक्तस्थानानि पूरयत -**

| अस्माकम्, किम्, एषः, तस्य, एतस्य |
|---|

(क) अतः ........................ नाम्ना ........................ नामकरणम् अभवत् ।

(ख) सम्प्रति ........................ एव।

(ग) एतस्य नामकरणस्य कारणं ........................ ?

(घ) महोदय! वदतु कृपया ........................ भारते।



www.rajteachers.com

## योग्यता-विस्तारः

### पाठ-विस्तारः

- महर्षिः पाणिनिः (भाषावैज्ञानिकः)
- संस्कृतव्याकरणस्य नियमानां रचयिता पाणिनेः जन्म शालातुरग्रामे अभवत्। एतस्य पितुः नाम पणिनः, मातुः नाम दाक्षी, आचार्यस्य च नाम वर्षः आसीत्। एषः अष्टाध्यायी नामकस्य व्याकरणग्रन्थस्य रचयिता आसीत्।
- प्राचीनवैज्ञानिकानां सूचीनिर्माणं कृत्वा तेषां चित्राणि अपि योजयेत्।
- आयुर्वेदे, योगे, नवीनाविष्कारे वैज्ञानिकानां योगदानं लिखत।



www.rajteachers.com

सप्तमः
पाठः
७

# स्वागतं ते राजस्थाने

## ( विशेषण-विशेष्य, कारक-प्रकरणम् )

पालीनगरतः

१४.१०.२०१५, बुधवासरः

प्रियमित्र मृदुल !

स्नेहेन नमस्कारः । अत्र कुशलं तत्रास्तु । भवतः पत्रम् अद्यैव प्राप्तम् । ज्ञात्वा प्रसन्नता जाता यद् भवतः सपरिवारं भ्रमणार्थं राजस्थानम् आगमनस्य योजना अस्ति । भवान् राजस्थानस्य दर्शनीयस्थलानां विषये पृष्टवान् तद् विषये लिखामि । राजस्थानस्य **प्रत्येकस्मिन्** भागे दर्शनीयानि स्थलानि सन्ति किन्तु दीपोत्सवस्य अवकाशे मारवाडक्षेत्रस्य भ्रमणम् आनन्देन भवति। यतो हि अस्मिन् समये **अधिका उष्णता** न भवति।



राजस्थानं वीराणां वीराङ्गनानां च भूमिः अस्ति । अत्र **विविधानि ऐतिहासिकस्थलानि** अस्मभ्यं गौरवशालीतिहासस्य परिचयं कारयन्ति ।

जैसलमेरुनगरे स्थितं सोनारदुर्गं स्वर्णमयीपीतपाषाणैः निर्मितम् **अद्भुतं दुर्गम्** अस्ति। **जनपदे अस्मिन्** सीमावर्ति तनोटमातुः मन्दिरं तु **सर्वेषां भारतीयानां** मनसि देशं प्रति गौरवभावमुत्पादयति। भारतीयैः साकं वैदेशिकाः अत्रागत्य पटवाप्रासादान्, थारमरुस्थलं, भादरियास्थाने स्थितं **बृहत्तमं पुस्तकालयं** रामदेवरास्थानं च प्रतिवर्षं पश्यन्ति। विश्वविख्यातम् आणविकपरीक्षणनगरं पोकरणस्य **समीपस्थं खेतोलाईस्थानमपि** जैसलमेरुजनपदे दर्शनीयमेव अस्ति।

सूर्यनगरिरूपेण **प्रसिद्धं जोधपुरनगरमपि ऐतिहासिकं महत्वं** धारयति। मारवाडराज्यस्य राजधानीरूपेण प्रसिद्धेऽस्मिन् नगरे मेहरानगढदुर्गः, राजस्थानस्य ताजमहलरूपेण **प्रसिद्धं जसवन्तथडा** नामकं स्थानं, कायलानाकासारः, मण्डोरोद्यानं च **इत्यादीनि स्थलानि** सन्ति। वीरशिरोमणेः प्रतापस्य मातुलगृहं पालीनगरमेवास्ति। पालीजनपदे परशुराममहादेवस्य मन्दिरं, स्थापत्यदृष्ट्या **विश्वप्रसिद्धं रणकपुरजैनमन्दिरम्** अपि विद्यते। एवमुच्यते यत् अस्मिन् जैनमन्दिरे निर्मितानां स्तम्भानां गणनापि दुष्करं वर्तते।

मारवाडतः अतिरिक्तं मेवाडक्षेत्रमपि भ्रमणार्थं गन्तुं शक्यते । उदयपुरनगरे दुर्गैः, स्तम्भैः, कासारैः च नवनिर्मितम् प्रतापगौरवकेन्द्रं विशेषरूपेण द्रष्टव्यमस्ति। अनेन सार्धं आबूपर्वतः, जयपुरक्षेत्रं, घानापक्षीविहारः, उत्कृष्टानि **विभिन्नमन्दिराणि** रणथम्भौरेत्यादीनि अभयारण्यानि च दर्शनीयानि सन्ति ।



www.rajteachers.com

एतेषां दर्शनादेव मनसि आनन्दः गौरवभावं च जायते ।

एवमेव विश्वस्य **प्राचीनतमा अरावलीपर्वतमाला** राजस्थानं द्विभागयोः विभक्तं करोति। **अत्रत्या विशिष्टा** लोकसंस्कृतिः सामाजिकरीतयः नृत्यानि च जनान् आकर्षयन्ति । वैदेशिकाः पर्यटकाः अपि गौरवशालिं राजस्थानं नमन्ति।

अतः भवान् अवश्यमेव राजस्थानम् आगच्छतु । भवान् यस्मिन् भागे भ्रमितुमिच्छति तस्य योजनाविषये शीघ्रमेव सूचयतु । परिवारे ज्येष्ठेभ्यः प्रणामाः निवेदयतु ।

भवतः आगमनस्य प्रतीक्षायाम्।

**भवतः मित्रम्**

**अजयः**

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| श्रेष्ठतमम् | सर्वोत्तमम् | सर्वश्रेष्ठ |
| जनपदेषु | जिलासु | जिलों में |
| चिरकालात् | दीर्घकालात् | लम्बे समय से |
| प्रासादम् | भवनम् | हवेली |
| कासारः | सरोवरः | झील |
| शिरोमणिः | प्रमुखः | प्रमुख |
| उत्कृष्टानि | विशिष्टानि | विशेष |
| द्रष्टव्यम् | दर्शनीयम् | देखने योग्य |

## अभ्यासः

### मौखिकप्रश्नाः

१. **उच्चारणं कुरुत-**

| | | | | |
|---|---|---|---|---|
| बृहत्तमम् | दृष्ट्या | अत्रत्याः | वीराङ्गनानाम् | सर्वेषाम् |
| वैदेशिकाः | शिरोमणिः | स्तम्भानाम् | स्थापत्यम् | उत्कृष्टानि |



www.rajteachers.com

२. एकपदेन उत्तरत -

(क) कस्मिन् समये मारवाडक्षेत्रस्य भ्रमणम् आनन्देन भवितुं शक्नोति ?

(ख) पुस्तकालयेषु बृहत्तमः पुस्तकालयः कुत्र स्थितः वर्तते ?

(ग) जोधपुरनगरे किं दुर्गम् ?

(घ) प्रतापस्य मातुलगृहं कुत्रास्ति ?

(ङ) के अपि गौरवशालिं राजस्थानं नमन्ति?

## लिखितप्रश्नाः

१. एकपदेन उत्तरत -

(क) विश्वस्य प्राचीनतमा पर्वतमाला का ?

(ख) दीपावलीसमये कस्मिन् क्षेत्रे भ्रमणम् आनन्ददायकम् ?

(ग) स्थापत्यदृष्ट्या विश्वप्रसिद्धं किं मन्दिरम् ?

(घ) किं मन्दिरं भारतीयानां मनसि देशं प्रति गौरवभावमुत्पादयति ?

(ङ) कः राजस्थानस्य भ्रमणार्थम् आगन्तुम् इच्छति ?

२. एकवाक्येन उत्तरत -

(क) राजस्थानं केषां भूमिः अस्ति?

(ख) प्रतापगौरवकेन्द्रं कुत्र वर्तते?

(ग) विश्वस्य प्राचीनतमा पर्वतमाला का?

(घ) सूर्यनगरिरूपेण प्रसिद्धं किं नगरम् ?

(ङ) रमेशः कस्मै पत्रम् लिखितवान्?

३. उचितं मेलनं कुरुत -

| (क) | (ख) |
|---|---|
| (क) परशुराममहादेवः | १. पालीजनपदे |
| (ख) पटवाप्रासादानि | २. उदयपुरनगरे |
| (ग) राजस्थानस्य ताजमहलम् | ३. अरावलीपर्वतमाला |
| (घ) प्रतापगौरवकेन्द्रम् | ४. जैसमेरुनगरे |
| (ङ) प्राचीनतमा पर्वतमाला | ५. जसवन्तथडा |



www.rajteachers.com

## ४. कोष्ठके दत्तपदैः रिक्तस्थानानि पूरयत -

(राजस्थानं, स्वर्णनगरी, सममरुस्थलम् सूर्यनगरी, सप्त)

(क) जोधपुरनगरं ............................ रूपेण प्रसिद्धमस्ति ।

(ख) ................................. जैसलमेरुजनपदे स्थितमस्ति ।

(ग) जैसलमेरुनगरम् ...................... रूपेण ख्यातिं प्राप्तवान् ।

(घ) राजस्थाने .......................... ......... सम्भागाः सन्ति ।

(ङ) अरावलीपर्वतमाला ................ द्विभागयोः विभक्तं करोति ।

## ५. रेखाङ्कितपदान् स्वीकृत्य प्रश्ननिर्माणं कुर्वन्तु -

(क) प्रशासनिकदृष्ट्या राजस्थानं त्रयस्त्रिंशत् जनपदेषु विभक्तं वर्तते।

(ख) जोधपुरनगरे कायलानाकासारः वर्तते।

(ग) अरावलीपर्वतमाला राजस्थाने स्थितास्ति ।

(घ) महाकविः माघः राजस्थाने अभवत्।

(ङ) प्रतापस्य गौरवगानं प्रतापगौरवकेन्द्रं करोति।

## ६. दत्तानां पदानां साहाय्येन स्वरचित-वाक्यानां लेखनं कुरुत -

(क) बहिः ................................................... ।

(ख) अभवत् ................................................... ।

(ग) नमः ................................................... ।

(घ) श्रेष्ठतमा ................................................... ।

(ङ) सह ................................................... ।

(च) रोचते ................................................... ।



www.rajteachers.com

## योग्यता-विस्तारः

### ( क ) भाषा-विस्तारः

**विशेष्य-विशेषणम् -** येन शब्देन संज्ञापदस्य विशेषता प्रकटी भवति सः शब्दः विशेषणः कथ्यते। यस्य पदस्य विशेषता प्रकटितं भवति सः विशेष्यः भवति। विशेषणः विशेष्यपदानुगुणमेव भवति।

उक्तमपि वर्तते -

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य ।।

**यथा -**

| पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| सुन्दरः बालकः | सुन्दरी बालिका | सुन्दरं वनम् |
| शौभनौ ग्रन्थौ | शोभने पत्रिके | शोभने पुस्तके |
| महान् ग्रन्थः | महती नाटिका | महत् नगरम् |
| लघुः कायः | लघ्वी कथा | लघु काव्यम् |
| श्रेष्ठतमः पुरूषः | श्रेष्ठतमा नारी | श्रेष्ठतमं पुष्पम् |

अन्यानि विशेषण-विशेष्यपदानि स्वीकृत्य पञ्चवाक्यानां रचना करणीया।

### ( ख ) कारकप्रकरणम्

कारकाणि षट् सन्ति- कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं च। कारकाणां बोधकारी विभक्तिः उच्यते।

१. **प्रातिपदिकः ( शब्दः ), लिङ्गम् ( पुँल्लिङ्गम्, स्त्रीलिङ्गम्, नपुंसकलिङ्गम् ) परिणाम ( द्रोणम्, व्रीहिः ) वचनं ( एकवचनं, द्विवचनं, बहुवचनं ) बोधयितुं प्रथमा विभक्तिः प्रयुज्यते।**

यथा - कृष्णः, श्रीः, ज्ञानम् , एकः, एकम्, एका, द्वे, त्रयः।

२. **कर्तायाः सर्वाधिकम् इप्सितं कर्मकारकम् उच्यते। कर्मकारके द्वितीया विभक्तिः प्रयुज्यते।**

यथा - माषेषु अश्वं बध्नाति।


www.rajteachers.com

३. **क्रियायाः सिद्ध्यर्थे सर्वाधिकसहायकसाधनः करणमुच्यते। करणकारके तृतीया विभक्तिः प्रयुज्यते।**

यथा – सः कलमेन लिखति ।पादाभ्यां चलति ।

४. **दानादि कर्मणा यम् उपक्रियते सः सम्प्रदानसंज्ञकं स्यात्। सम्प्रदाने चतुर्थीविभक्तिः प्रयुज्यते।**

यथा – विप्राय गां ददाति ।

५. **यस्मात् अपाय/विश्लेष/पृथक्करणं भवति सः अपादानसंज्ञकं स्याद् । अपादने पञ्चमीविभक्तिः प्रयुज्यते ।**

यथा – ग्रामाद् नगरं गच्छति । वृक्षात् पत्राणि पतन्ति ।

६. **स्व-स्वामीभावसम्बन्धं प्रदर्शयितुं षष्ठी विभक्तेः प्रयोगः भवति ।**

यथा – राज्ञः पुरुषः ।राजस्थानस्य गौरवम् ।बालिकानां क्रीडनकानि ।

७. **क्रियायाः आधारः अधिकरणसंज्ञकं स्यात् ।**

**अधिकरणे सप्तमीविभक्तिः प्रयुज्यते।**

यथा – कटे आस्ते ।स्थाल्यां पचति।

८. **अभितः परितः, समया, निकषा, हा, धिक्, प्रति योगे द्वितीयाविभक्तिः भवति।**

यथा – ग्रामम् अभितः उद्यानम् अस्ति। अस्माकं विद्यालयं परितः स्वच्छता भवेत्। ग्रामं निकषा तडागः अस्ति। सः नगरं प्रति गच्छति।

९. **विना, नाना, पृथक् शब्दानां योगे द्वितीया, तृतीया पञ्चमी च विभक्तयः भवन्ति।**

यथा– धनं, धनेन, धनात्, वा विना शून्यं जीवनम् ।रामं, रामेण, रामात्, वा पृथक् नाहं जीवामि। संस्कृतिं संस्कृत्या संस्कृत्याः वा विना राष्ट्रस्य गौरवं विनश्यति।

१०. **साकं, सार्धम् समम् सह योगेऽप्रधानकर्त्तरि, तृतीयाविभक्तिः भवति।**

यथा– सीता रामेण सह गच्छति वनम् ।भगतसिंहेन सह राजगुरुसुखदेवयोः बलिदानमभवत्।

११. **अङ्गविकारयोगे अङ्गवाचकशब्दे तृतीयाविभक्तिः भवति ।**

यथा – सः नेत्रेण काणः । बालकः पादेन खञ्जः।

१२. **नमः स्वस्ति, स्वाहा, स्वधा, अलं, वषड् योगे चतुर्थीविभक्तिः भवति ।**

यथा – गुरवे नमः । देशभक्तेभ्यः नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा ।पितृभ्यः स्वधा । अलं विवादाय ।इन्द्राय वषट् ।



www.rajteachers.com

**१३. क्रुध, द्रुह, ईर्ष्य, असूय शब्दानां योगे यं प्रति एषः प्रयुज्यते तत्र सम्प्रदानकारकं भवति।**

यथा – पिता पुत्राय क्रुध्यति । रामः मोहनाय ईर्ष्यति । सा लतायै असूयति ।

**१४. भी, त्रा रक्ष् धातुयोगे यस्मात्, भयादि भवति तत्र पञ्चमीविभक्तिः भवति ।**

यथा – चौरात् बिभेति । सिंहात् त्रायते । पापेभ्यः रक्षति ।

**१५. जन्, भू धातुयोगे उत्पत्तिस्थाने पञ्चमी विभक्तिः भवति।**

यथा – गोमयात् वृश्चिकाः प्रजायन्ते । गङ्गा हिमालयात् प्रभवति।

**१६ तरप् प्रत्यययोगे पञ्चमी विभक्तिः भवति ।**

यथा– निम्बवृक्षात् पिप्पलवृक्षः पवित्रतरः । ज्ञानात् ध्यानं श्रेष्ठतरम् ।

**१७. तमप् प्रत्यय योगे षष्ठी वा सप्तमी विभक्तिः भवति ।**

यथा– गवां गोषु वा कृष्णा बहुक्षीरा । कवीनां कविषु वा कालिदासः श्रेष्ठतमः ।



www.rajteachers.com

अष्टमः पाठः ८

# मृदपि च चन्दनम्

मृदपि च चन्दनमस्मिन् देशे, ग्रामो ग्रामः सिद्धवनम्।
यत्र च बाला देवीस्वरूपा, बालाः सर्वे श्रीरामाः ।।



हरिमन्दिरमिदमखिलशरीरम्
धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः,
धेनुर्माता परमशिवा ।।



नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा।। मृदपि .......... ।।



भाग्यविधायी निजार्जितकर्म
यत्रश्रमः श्रियमर्जयति
त्यागधनानां तपोनिधीनां
गाथां गायति कविवाणी



गङ्गाजलमिव नित्य निर्मलं
ज्ञानं शंसति यतिवाणी।। मृदपि .......... ।।



यत्र हि नैव स्वदेहविमोहः
युद्धरतानां वीराणाम्।
यत्र हि कृषकः कार्यरतः सन्
पश्यति जीवनसाफल्यम्

जीवनलक्ष्यं न हि धनपदवी
यत्र च पर शिवपदसेवा ।। मृदपि।। .................... ।।

(श्री जनार्दन हेगडे)



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| मृदपि | मृत्तिका अपि | मिट्टी भी |
| सिद्धवनम् | तपस्थानम् | तपोभूमि |
| जनसेवायै | लोकसेवायै | लोगों की सेवा |
| क्रीडायै | रमणाय | खेलने के लिए |
| खलु | निश्चयेन | निश्चय से |
| दीपनुतिः | दीपाय नमस्कारः | दीप को नमस्कार |
| शत्रुपरा | शत्रुहितसम्बन्धः | शत्रु के हित सम्बन्धी |
| भाग्यविधायि | भाग्यस्य विधाता | भाग्य का विधाता |
| निजार्जितकर्म | स्व उपार्जितकर्म | स्वयं द्वारा अर्जित कर्म |
| श्रियमर्जयति | धनमर्जयति | धन कमाता है। |
| शंसति | प्रसारयति | फैलाता है। |
| यतिवाणी | मुनिवाक् | मुनियों की वाणी |
| स्वदेहविमोहः | स्वशरीरस्य विशेषमोहः | शरीर का विशेष मोह |
| युद्धरतानां | युद्धे संलग्नानां | युद्ध में लगे हुए का |
| जीवनसाफल्यम् | जीवनस्य समृद्धिः | जीवन की सफलता |
| परशिवपदसेवा | परं लक्ष्यं शिवपादार्चनम् | जीवन का परम लक्ष्य शिव के चरणों की सेवा |
| धनपदवी | धनं पदं च | धन और पद |

## अभ्यासः

### मौखिकप्रश्नाः

१. **शब्दानाम् उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| मृदपि, | सिद्धवनम्, | देवीस्वरूपाः, | दीपनुतिः, |
| भाग्यविधायि, | निजार्जितकर्म, | श्रियम् शंसति, | स्वदेहविमोहः, |
| कृषकः, | जीवनसाफल्यम्, | युद्धरतानाम्, | धनपदवी । |



www.rajteachers.com

२. **प्रश्नानाम् उत्तराणि वदत –**

(क) मृदपि कीदृशम् अस्ति ?

(ख) सर्वे बालाः कस्य रूपे सन्ति ?

(ग) कविवाणी केषां गाथां गायति ?

(घ) प्रातः कस्य गुणगानं भवति ?

(ङ) गङ्गाजलं कीदृशं वर्तते ?

## लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एक पदेन लिखत –**

(क) सिद्धवनं किम् अस्ति?

(ख) देवीस्वरूपाः काः सन्ति ?

(ग) कस्य विमोहः नास्ति ?

(घ) यतिवाणी किं करोति ?

(ङ) जीवनलक्ष्यं किम् अस्ति ?

२. **रिक्तस्थानानि पूरयत –**

(क) हरिमन्दिरम् .......................... शरीरम् ।

(ख) यत्र च .......................... वनराजः ।

(ग) दीपनुतिः .......................... शत्रुपरा ।

(घ) यत्रहि .......................... सन् ।

(ङ) यत्र श्रमः .......................... अर्जयति ।

३. **उदाहरणम् अनुसृत्य शब्दं, धातुरूपम् अव्ययं च पृथक् कृत्वा लिखत –**

(अपि, ग्रामः, धेनुः, गायति, कृषकः, यत्र, शंसति, च, न, हि, वनराजः, प्रातः, खलु, अर्जयति, नित्यम्, इव)

| | शब्दरूपं | धातुरूपम् | अव्ययम् |
|---|---|---|---|
| उदाहरणम् – | धेनुः | अर्जयति | च |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |
| | ............ | ............ | ............ |



www.rajteachers.com

४. निम्नाङ्कितशब्दानां सन्धि-विच्छेदं कुरुत-

| शब्दः | | सन्धि-विच्छेदं |
|---|---|---|
| नैव | - | ............. + .............. |
| धेनुर्माता | - | ............ + ............... |
| निजार्जित | - | ............ + ............... |

५. अर्ज्, गी एवं शंस् धातूनाम् रूपाणि लट्लकारे लिखतु -

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अर्जयति | अर्जयतः | अर्जयन्ति |
| मध्यमः पुरुषः | ................ | अर्जयथः | ............... |
| उत्तमः पुरुषः | ................ | ............... | अर्जयामः |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | गायति | गायतः | ............... |
| मध्यमः पुरुषः | गायसि | ............... | ............... |
| उत्तमः पुरुषः | ............... | गायावः | ............... |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | ............... | शंसतः | शंसन्ति |
| मध्यमः पुरुषः | शंससि | ............... | ............... |
| उत्तमः पुरुषः | शंसामि | ............... | ............... |

## योग्यता-विस्तारः

**कविपरिचयः** - प्रसिद्धदेशभक्तिगीतस्य रचनाकारः लब्धप्रतिष्ठः गीतकारः जनार्दन हेगडे बेंगलुरूतः प्रकाशितायाः मासिकपत्रिकायाः सम्भाषणसन्देशस्य सम्पादकः वर्तते। कविनानेन एतादृषाणि बहूनि गीतानि रचितानि।समभावी अन्यभाषाणां गीतानां स्मरणं कुरुत -

**यथा** - (१) चन्दन है इस देश की माटी।
तपो भूमि हर ग्राम है।
हर बाला देवी की प्रतिमा
बच्चा बच्चा राम है।



www.rajteachers.com

(२) आओ बच्चों तुम्हें दिखाये झांकी हिन्दुस्तान की
इस मिट्टी से तिलक करो यह धरती है बलिदान की
वन्दे मातरम् .....

## ( गीतम् )

### नैव क्लिष्टा न च कठिना

सुरस सुबोधा विश्व मनोज्ञा
ललिता हृद्या रमणीया।
अमृतवाणी संस्कृत भाषा
नैव क्लिष्टा न च कठिना।

कविकोकिल-वाल्मीकि-विरचिता
रामायणरमणीयकथा।
अतीव-सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना ।।
सुरस ............................... ।।

व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा।
कौरव-पाण्डव-सङ्गरमथिता
नैव क्लिष्टा न च कठिना ।।
सुरस ............................... ।।

कुरूक्षेत्र - समराङ्गण - गीता
विश्ववन्दिता भगवद्गीता।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना ।।
सुरस ............................... ।।

कविकुलगुरू-नव रसोन्मेषजा
ऋतु-रघु-कुमार-कविता।
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिना ।।
सुरस ............................... ।।


www.rajteachers.com

नवमः पाठः
९

# यौतकं पातकम्

(हलन्तशब्दाः)

(प्रस्तुतनाट्यांशे विद्याधरस्य पुत्र्याः सरलायाः विवाहमाध्यमेन महिलासशक्तीकरणस्य भावः उद्दिप्तः। यौतकं ग्रहणं प्रदानं च महापातकमिति सन्देशं प्राप्तुं वयम् अग्रेसरामः।)

**पात्रपरिचयः**

| | | |
|---|---|---|
| विद्याधरः | – | सेवानिवृत्तः शिक्षकः |
| लक्ष्मी | – | विद्याधरस्य पत्नी |
| सरला | – | विद्याधरस्य पुत्री |
| नलिनी | – | सरलायाः सखी |
| राघवः | – | विद्याधरस्य मित्रम् |
| श्रीधरः | – | वरस्य पिता |
| मित्रावसुः | – | श्रीधरस्य पुत्रः |
| बलवीरः | – | प्रथमारक्षकः |
| विक्रमसिंहः | – | द्वितीयारक्षकः |
| आरक्षकाधीक्षकः | – | .................. |






www.rajteachers.com

## ( प्रथमं दृश्यम् )

(ततः धावनध्वनिना सह तीव्रः श्वासोच्छ्वासस्य ध्वनिः।)

नलिनी – सरले ! हे सरले !

सरला – आम् ! किम् अभवत् ?

नलिनी – तत्र......तत्र.....वरयात्रायां....तु (पुनः श्वासोच्छ्वासस्य ध्वनिः) स्थितिः सामान्या नास्ति।

सरला – (साश्चर्येण) हऽऽ ! हे भगवन् !

नलिनी – आम्।

सरला – (विषादेन) तर्हि तातम् आह्वयतु ।(विरम्य) अरे सः तु स्वयम् एव अत्र आगच्छति। पृच्छामि तावत्।

विद्याधरः – सरले ! (कण्ठोऽवरुध्यते) सरले !

सरला – पितः ! किं भवति तत्र द्वारे ? भवानपि व्याकुलः प्रतीयते।

विद्याधरः – (निःश्वस्य) वञ्चिताः स्मः वयम्।

सरला – (साश्चर्यम्) किम् ?

विद्याधरः – आम्। ते तु यौतकलुब्धकाः सन्ति। (निःश्वस्य) वरपूजायामपि स्वचलद्विचक्रम् इच्छन्ति। (विरम्य) एषा तव माता अपि आगतवती ।लक्ष्मि ! वञ्चिता स्मः वयम्।

लक्ष्मीः – आम्। सर्वं ज्ञातवती।

विद्याधरः – तर्हि किं करणीयम् ?

लक्ष्मीः – **भवन्तः** एव प्रमाणम्।

विद्याधरः – एषः राघवो अपि आगच्छति। भवानेव वदतु राघव ! किं करवाम ?

राघवः – अहमपि न जानामि। वाग्दानावसरे तु श्रीधरः कथम् आसीत् ? अधुना कथम् अभवत् ?

विद्याधरः – गजस्य दन्ताः भक्षणस्य अन्ये दर्शनस्य अन्ये भवन्ति मित्र ! एषः **आत्मनि** कुटिलः अस्ति।

राघवः – अस्तु, इदानीं किं करणीयम् ?

सरला – किमपि न करणीयम्। केवलं शठे शाठ्यं समाचरणीयम्।

विद्याधरः – किं वदति सरले !

सरला – (दृढतया) आम् सत्यं वदामि।



www.rajteachers.com

**राघवः** – किमर्थम्?

**सरला** – अहं विवाहमपि न करिष्यामि।

**विद्याधरः** – कारणम्?

**सरला** – (रुद्धकण्ठा रोदिति) कारणं...कारणं स्पष्टम्। अद्य तु स्वचलद्विचक्रम् इच्छन्ति, श्वः कारयानं वाञ्छिष्यन्ति, परश्वः किमप्यन्यद्। किं किं दास्यति **भवान्**? एते तु वराकाः बुभुक्षिताः वृकाः सन्ति।

**विद्याधरः** – सरला सत्यं वदति, परन्तु अस्मिन् समये मम श्मश्रुणः प्रश्नः अस्ति।

**सरला** – भवतु, **भवतः** श्मश्रुणः नासिकायाः वा प्रश्नः? किन्तु अहं तु तेन पिशाचेन सहोद्वाहं न करिष्यामि।

**विद्याधरः** – न......न......तद् न भविष्यति। आगच्छ मित्र! व्यवस्थां कुर्मः। (गमनध्वनिः)

**सरला** – मा करोतु तात...................... ।

**लक्ष्मीः** – सम्यग् विचारयतु सरले! अस्मिन् समये अन्यः कः उपायः?

**सरला** – उपायः? उपायं तु अहं जानामि। कुत्रास्ति मम चलदूरभाषः? आरक्षागारे सूचयामि। (अङ्कनोदनस्य ध्वनिः। ततः दूरभाषसङ्केतध्वनिः आगच्छति।)

**लक्ष्मीः** – **भवत्या** किं कृतम् एतत् सरले! (दृश्यपरिवर्तनसङ्गीतध्वनिः)

## (द्वितीयं दृश्यम्)

(ततः मरुत्तरयानस्य ध्वनिः आगच्छति। कोलाहलश्च भवति ।)

**श्रीधरः** – अरे ! अस्मान् परितः आरक्षकाः एव आरक्षकाः सन्ति। किं करवाणि?

**आरक्षकाधीक्षकः** – कोऽपि पलायनस्य दुःसाहसं मा करोतु। **भवन्तः** सर्वे अस्माकं निबन्धने सन्ति।

**श्रीधरः** – हं होऽऽ विद्याधर! कुचक्रमेतद् भवतः अस्ति? द्रक्ष्यामि **भवन्तम्** अनन्तरम्।

**आरक्षकाधीक्षकः** – (क्रोधेन) किं प्रलपति? **आत्मानं** पश्य प्रथमम्। कारागृहे अवतारयिष्यामि **भवतः** नेत्राभ्यां यौतकपट्टिकां, तदा पश्यतु। विक्रमसिंह! एषः वरस्य पिता अस्ति। नयतु एनम्। कारागृहे एव एतस्य सत्कारं करिष्यामः।

**श्रीधरः** – क्षम्यतां क्षम्यताम्।

**प्रथमारक्षकः** – चलति वा न वा?(दण्डप्रहारस्य ध्वनिः)

**आरक्षकाधीक्षकः** – बलवीर! तं वरराजम् अश्वादवतारय। कारागृहे एव वरोपचारः भविष्यति एतस्य।

**मित्रावसुः** – मम दोषो नास्ति। मुञ्चतु माम्।



www.rajteachers.com



**द्वितीयारक्षकः** – मोचयामि। कारागृहे **भवते** यौतकं दत्वा वरोपचारे। (व्यंग्येन हसति)

**आरक्षकाधीक्षकः** – कुत्र अस्ति सरला? सा तु निर्भीका कन्या अस्ति। यदि तादृश्यः सर्वाः कन्याः भविष्यन्ति चेत् तदा एतादृशी समस्यापि नागमिष्यति। एषः एकस्याः सरलायाः वा कस्य अपि एकस्य विषयः नास्ति अपितु अस्माकं सर्वेषां विषयः अस्ति। अतः अस्मिन् विषये सर्वे जागरुकाः भवन्तु। (विद्याधरं प्रति) अस्तु, विद्याधरमहोदय! अद्यैव योग्यं वरम् अन्वेष्य सरलायाः विवाहः क्रियताम्। विवाहवेला मा अतिक्राम्यतु।

**विद्याधरः** – श्रीमन्! सेवानिवृत्तशिक्षकः अस्मि। जीवने यद् धनम् अर्जितं तद् धनम् एतस्याः शिक्षायै व्ययीकृतम्। निर्यौतकस्य तनयायै योग्यः वरः कुत्र? पुनश्चेदानीं नूतनः वरः तु दुर्लभः।

**आरक्षकाधीक्षकः** – अस्ति महोदय! अस्ति। यदि **भवान्** इच्छति चेद् योग्यः नूतनश्च वरः सुलभः एव अस्ति।

**विद्याधरः** – (साश्चर्येण) कुत्र?

**आरक्षकाधीक्षकः** – मम पुत्रः राकेशः। प्रशासकीयः अधिकारी अस्ति। सर्वथा सरलायाः योग्यः अस्ति।

**विद्याधरः** – (गद्गदस्वरेण) एतत् तु अस्माकं सौभाग्यमस्ति।

**आरक्षकाधीक्षकः** – अहमपि सरलां पुत्रवधूरूपेण प्राप्य **आत्मानं** धन्यं मन्ये।

**सर्वे** – साध–साधु।

**( गीतस्य ध्वनिः )**

वनिते ऽऽऽऽ! वरराजा आगच्छति।
अश्वारूढो मुखे ताम्बूलं, करे कृपाणः सज्जति।।
इतस्ततः सम्यगवलोकने समधिकसुखं प्रयच्छति।
गच्छति कुत्र स्वयं नावबुध्यते,मनः इतः आकर्षति।।
वनिते ऽऽऽऽ! वरराजा आगच्छति।।
(ध्वनिः मन्दं भवति।)

(वाग्देवतावतारः नामकात् ध्वनिरूपकसङ्ग्रहात् सङ्कलितः)



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| स्खलितस्वरेण | प्रकम्पितस्वरेण | लड़खड़ाते स्वर से |
| वञ्चिताः | छलिताः | ठगे गये |
| विषादेन | दुःखेन | दुःख से |
| स्वचलद्विचक्रम् | मरुत्तरद्विचक्रिका | मोटरसाइकिल |
| निबन्धने | निगडने | बन्दी बनाए गए |
| उद्वाहः | विवाहः | विवाह |
| मोचयामि | त्यजामि | छोड़ता हूँ |
| आरक्षकः | रक्षापुरुषः | सिपाही |
| अन्वेष्य | अन्वेषणं कृत्वा | खोज कर |
| आत्मानम् | स्वीयम् | अपने आपको |
| अर्जितम् | अर्जनं कृतम् | कमाया |
| तनयायै | पुत्र्यै | पुत्री के लिये |
| वेलां | समयं | समय को |
| मा | न | नहीं |
| अतिक्राम्यतु | अतिक्रमणं करोतु | अतिक्रमण करे |
| निर्यौतकस्य | यौतकरहितस्य | बिना दहेज वाले की |
| कृपाणः | खड्गः | तलवार |
| नावबुध्यते | न जानाति | नहीं जानता है। |
| इतस्ततः | यत्र तत्र | इधर उधर |
| समधिकसुखम् | विपुलः आनन्दः | अत्यधिक प्रसन्नता |
| नोदनम् | पीडनम् | दबाना |
| वरोपचारः | वराय कृता पूजा | वर के लिए की गई पूजा |



www.rajteachers.com

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

श्वासोच्छ्वासः आह्वयतु वाग्दानावसरे शाठ्यम् श्मश्रुणः
बुभुक्षिताः निर्यौतकस्य नावबुध्यते आकर्षति अन्वेष्य।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) सरला काम् आह्वयति ?
(ख) विद्याधरः कस्य पिता अस्ति ?
(ग) वरस्य नाम किम् अस्ति ?
(घ) यौतके ते किम् इच्छन्ति ?
(ङ) आरक्षकाधीक्षकस्य पुत्रः कः ?

### लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) विद्याधरस्य मित्रं कः अस्ति ?
(ख) विद्याधरः कस्मात् कार्यात् निवृत्तः ?
(ग) यौतकपट्टिका कस्य नेत्रयोः उपरि आसीत् ?
(घ) "वञ्चिताः स्मः वयम्"। इति कः उक्तवान् ?
(ङ) अश्वारूढः कः अस्ति ?

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

(क) कस्य दन्ताः भक्षणस्य दर्शनस्य च भिन्नाः भवन्ति ?
(ख) पाठे कस्याः विवाहः अस्ति ?
(ग) "भवत्याः किं कृतम् एतत् सरले !" इति का उक्तवती ?
(घ) राघवः कस्य मित्रम् ?
(ङ) सरलां वधूरूपेण प्राप्य कः आत्मानं धन्य मन्यते ?
(च) आरक्षकागारे दूरभाषेण का सूचितवती ?



www.rajteachers.com

३. **मञ्जूषातः चित्वा अधोलिखितानि रिक्तस्थानानि पूरयत -**

| शाठ्यं, सरलायाः, सर्वे जागरुकाः, व्यवस्थां, व्याकुलः |
|---|

(क) अतः अस्मिन् विषये .............................. भवन्तु।

(ख) भवान् अपि .................................... प्रतीयते।

(ग) केवलं शठे .............................. समाचरणीयम्।

(घ) धनस्य ........................................ कुर्म।

(ङ) सर्वथा .................................. योग्यः अस्ति।

४. **अधोलिखितम् उदाहरणं पठित्वा विभक्तिं संयोज्य पूरयत -**

उदाहरणम् - दशरथः रामस्य पिता अस्ति। ( राम )

(क) राघवः .............................. पतिः अस्ति। ( विमला )

(ख) लक्ष्मीः .............................. पत्नी अस्ति। ( विद्याधर )

(ग) विद्याधरः .............................. पिता अस्ति। ( सरला )

(घ) श्रीधरः .............................. पिता अस्ति। ( मित्रावसु )

(ङ) सरला .............................. सखी अस्ति। ( नलिनी )

५. **रेखाङ्कितं पदम् आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) मम दोषः नास्ति।

(ख) सरला निर्भीका कन्या अस्ति।

(ग) भवन्तः सर्वे अस्माकं निबन्धने सन्ति।

(घ) अस्मान् परितः आरक्षकाः सन्ति।

(ङ) करे कृपाणः सज्जति।

६. **विपरीतार्थकान् शब्दान् लिखत -**

(क) मिथ्या - ..............................

(ख) पुरातनः - ..............................

(ग) सुलभः - ..............................

(घ) दुर्भाग्यम् - ..............................

(ङ) तीव्रम् - ..............................



www.rajteachers.com

## योग्यता-विस्तारः

१. **कवि परिचय :** - प्रस्तुतः पाठः परमानन्दः शर्मा ''प्रमोदः'' द्वारा विरचिताद् 'वाग्देवतावतारः' नामकाद् ध्वनिरूपकसङ्ग्रहात् सङ्कलितः अस्ति।

२. ''बालविवाहः समाजे अभिशापः'' इति विषयम् आधारीकृत्य शिक्षकस्य सहयोगेन एकस्य नाटकस्य अभिनयं कुर्वन्तु।

३. अनौपचारिकरूपेण कक्षायां शिक्षकः एतस्य नाटकस्य मञ्चनं कारयेत्।

४. **लोकोक्तयः** -

(क) श्मश्रुणः प्रश्नः - मूँछ का सवाल।

(ख) गजस्य दन्ताः भक्षणस्य अन्ये दर्शनस्य च अन्ये - हाथी के दांत खाने के अलग दिखाने के अलग।

(ग) शठे शाठ्यं समाचरणीयम् - दुष्ट के साथ दुष्टता का व्यवहार करना चाहिये।

५. उपर्युक्तलोकोक्तीनाम् अध्ययनं कृत्वा दश लोकोक्तीनां सङ्कलनं कुरुत।

## भाषा-विस्तारः

### तकारान्तः पुँल्लिङ्गे भवत् शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सम्बोधनम् | हे भवन् ! | हे भवन्तौ !! | हे भवन्तः !!! |



www.rajteachers.com

## तकारान्तः स्त्रीलिङ्गे भवत् शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवती | भवत्यौ | भवत्यः |
| द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| तृतीया | भवत्या | भवतीभ्याम् | भवतीभिः |
| चतुर्थी | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पञ्चमी | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी | भवत्याम् | भवत्योः | भवतीषु |
| सम्बोधनम् | हे भवति ! | हे भवत्यौ !! | हे भवत्यः !!! |

## तकारान्तः नपुंसकलिङ्गे भवत् शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवत् | भवती | भवन्ति |
| द्वितीया | भवत् | भवती | भवन्ति |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सम्बोधनम् | हे भवत् ! | हे भवती !! | हे भवन्ति !!! |


www.rajteachers.com

## नकारान्तः पुँल्लिङ्गे आत्मन् शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | आत्मा | आत्मानौ | आत्मानः |
| द्वितीया | आत्मानम् | आत्मानौ | आत्मानः |
| तृतीया | आत्मना | आत्मभ्याम् | आत्मभिः |
| चतुर्थी | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| पञ्चमी | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| षष्ठी | आत्मनः | आत्मनोः | आत्मनाम् |
| सप्तमी | आत्मनि | आत्मनोः | आत्मसु |
| सम्बोधनम् | हे आत्मन्! | हे आत्मानौ!! | हे आत्मानः!!! |

## ऊकारान्तः स्त्रीलिङ्गे वधू शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वधूः | वध्वौ | वध्वः |
| द्वितीया | वधूम् | वध्वौ | वधूः |
| तृतीया | वध्वा | वधूभ्याम् | वधूभिः |
| चतुर्थी | वध्वै | वधूभ्याम् | वधूभ्यः |
| पञ्चमी | वध्वाः | वधूभ्याम् | वधूभ्यः |
| षष्ठी | वध्वाः | वध्वोः | वधूनाम् |
| सप्तमी | वध्वाम् | वध्वोः | वधूषु |
| सम्बोधनम् | हे वधूः! | हे वध्वौ!! | हे वध्वः!!! |


www.rajteachers.com

दशमः पाठः १०

# दीनबन्धुः विवेकानन्दः



प्रातःकालस्य समयः आसीत्। पौषमासस्य अतीव शीतदिवसः। सूर्योदयः अभवत् तथापि मेघाच्छन्ने गगने इदानीमपि पूर्णप्रकाशस्य अभावः आसीत्। कोलकातानगरस्य राजपथेषु इतस्ततः जनाः अटनार्थं गच्छन्ति स्म। नरेन्द्रः अपि मार्गे गच्छति स्म। सहसा तस्य पादः किमपि वस्तु अस्पृशत्। सः व्यरमत् सम्यक् दर्शनेन ज्ञातवान् यत् जीर्णशीर्णैः वस्त्रैरावृतः कोऽपि मानवः मार्गे पतितः। तम् उत्थापयन् ''उत्तिष्ठ बन्धो ! उत्तिष्ठ।'' इति नरेन्द्रः उक्तवान् किन्तु सः अन्धः पङ्गुः चेतनाविहीनश्च आसीत्। तस्य मस्तकम् अपि रुधिरक्लिन्नम् आसीत्। नरेन्द्रः स्ववस्त्रेण तस्य मस्तके व्रणपट्टिकाम् अबध्नात्। अनन्तरं स्वकम्बलेन तम् आच्छादितवान्।

कतिपयकालानन्तरं प्राप्तायां चेतनायां नरेन्द्रः तं वृद्धम् ''भवान् कः ? एतादृशी गतिः कथम् अभवत्'' इति पृष्टे सति सः वृद्धः नेत्रे शून्ये प्रसार्य निःश्वस्य च उक्तवान्- ''जन्मना अस्पृश्यः अशुभदर्शनः अस्मि। मम दुर्भाग्यशालिनः मुखदर्शनेन भवतः एतद् दिनं व्यर्थम् अमङ्गलं च न भवेत्।'' तस्य नेत्रभ्याम् अश्रुधारा प्रवहति स्म।

नरेन्द्रः तं सान्त्वयन् सोद्वेगं ''अरे जन्मना एव कथम् अस्पृश्यता अपवित्रता अशुभदर्शनं च। वयं सर्वे ईश्वरस्य वरदपुत्राः। अस्तु भवतः एतां दुर्गतिं के कृतवन्तः'' इति पृष्टवान्।

ततः ''प्रभाते मङ्गलध्वनिं श्रुत्वा मन्दिरं मत्वा एकस्मिन् भवनं प्रविष्टवान्। तत्र अशुभदर्शनः अपवित्रः अस्पृश्यः इति उक्त्वा मां ताडितवन्तः। अन्धत्वेन न ज्ञातवान् के आसन् ते इति।''

नरेन्द्रस्य हृदयः व्यथितः सञ्जातः। करुणया तस्य स्कन्धे स्वहस्तं निधाय ''भवतः कुत्र गन्तव्यम् ?'' इति पृष्टे सति वृद्धः ज्ञापितवान् यत् सः रामकृष्णपरमहंसस्य आश्रमं गन्तुमिच्छति। नरेन्द्रः तं वृद्धं स्कन्धे निधाय गन्तव्यं प्रति प्रस्थितः।



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| अतीव | अत्यधिकम् | बहुत अधिक |
| मेघाच्छन्ने | मेघावृते | बादलों से ढके |
| राजपथेषु | राजमार्गेषु | सड़कों पर |
| अटनार्थं | भ्रमणार्थम् | घूमने के लिये |
| रुधिरक्लिन्नम् | रक्तेन आर्द्रम् | रक्त से गीला |
| प्रसार्य | विस्तार्य | फैलाकर |
| सान्त्वयन् | धैर्यं प्रदाय | धीरज बंधाकर |
| प्रविष्टवान् | प्रवेशं कृतवान् | प्रवेश किया |
| गन्तव्यं | गमनस्थानं | गमन स्थान को |
| निधाय | संस्थाय | रखकर |
| प्रस्थितः | चलितः | प्रस्थान किया |
| सञ्जातः | अभवत् | हुआ |





www.rajteachers.com

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत -**

मेघाच्छन्नेः इतस्ततः अस्पृशत् उत्थापयन् रुधिरक्लिन्नम्

व्रणपट्टिकां अबध्नात् जीर्णशीर्णः ज्ञापितवान् प्रस्थितः।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत -**

(क) कस्मिन् मासे अतीव शीतदिवसः आसीत् ?

(ख) मार्गे कः पतितः आसीत् ?

(ग) ''भवान् कः'' इति कः पृष्टवान् ?

(घ) वयं सर्वे कस्य वरदपुत्राः ?

### लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एक पदेन लिखत -**

(क) ''उतिष्ठ बन्धो! उतिष्ठ'' इति कः उक्तवान् ?

(ख) नरेन्द्रः वृद्धं केन आच्छादितवान् ?

(ग) कस्य नेत्राभ्याम् अश्रुधारा वहति स्म ?

(घ) अशुभदर्शनम् इति मत्वा वृद्धं के ताडितवन्तः ?

(ङ) कस्य हृदयः व्यथितः सञ्जाताः ?

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -**

(क) जनाः कुत्र अटन्ति स्म ?

(ख) वृद्धः कीदृशः आसीत् ?

(ग) वृद्धस्य दुर्गतिं के कृतवन्तः ?

(घ) कोलकातानगरस्य वातावरणं कथम् आसीत् ?

(ङ) वृद्धः कुत्र प्रविष्टवान् ?



www.rajteachers.com

**३. मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानानि पूरयत -**

**अश्रुधारा, गतिः, रक्तधारा, मस्तकम् अन्धत्वेन, जन्मना**

(क) तस्य .......................... रुधिरक्लिन्नम् आसीत् ।

(ख) एतादृशी .............................. कथम् अभवत् ।

(ग) ....................... अस्पृश्यः अशुभदर्शनः अस्मि ।

(घ) नेत्रभ्याम् ................................. प्रवहति स्म ।

(ङ) ........................... न ज्ञातवान् के आसन् ते ?

**४. अधोलिखितानां पदानां प्रयोगं कृत्वा वाक्यानि रचयत -**

| **शब्दः** | | **उदाहरणम्** |
|---|---|---|
| सर्वदा | - | अहं सर्वदा सत्यं वदामि । |
| तस्य | - | ...................................... । |
| आसीत् | - | ...................................... । |
| भवतः | - | ...................................... । |
| मम | - | ...................................... । |
| प्रवहति | - | ...................................... । |

**५. अधोलिखितेषु पदेषु सन्धिविच्छेदं कुरुत -**

| **पदम्** | **सन्धिविच्छेदः** |
|---|---|
| (क) सूर्योदयः | ................... + ................... । |
| (ख) तथापि | ................... + ................... । |
| (ग) नरेन्द्रः | ................... + ................... । |
| (घ) सोद्वेगम् | ................... + ................... । |
| (ङ) मेघाच्छन्ने | ................... + ................... । |

**६. अधोलिखितानां रेखाङ्कितपदानाम् आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) <u>अस्मिन्</u> पाठे दीनबन्धुः विवेकानन्दः अस्ति ।

(ख) राजपथेषु जना <u>अटनार्थं</u> गच्छति ।

(ग) नरेन्द्रः वस्त्रेण <u>तस्य</u> व्रणपट्टिकाम् अकरोत् ?

(घ) मन्दिरं मत्वा <u>एकस्मिन् भवनं</u> प्रविष्टवान् ?

(ङ) तस्य नेत्राभ्याम् <u>अश्रुधारा</u> प्रवहति ?




www.rajteachers.com

## योग्यता-विस्तारः

### (क) पाठविस्तारः

**श्रीरामकृष्णपरमहंसः**



यदा स्वामिदयानन्दः उत्तरभारते आर्यसमाजस्य प्रचारमकरोत् तदैव बंगप्रान्ते रामकृष्णपरमहंसः स्वोपदेशैर्नवजीवनसञ्चारं करोति स्म। रामकृष्णमहोदयानां जन्म हुगलीजनपदे एकस्मिन् निर्धनब्राहणपरिवारे अभवत्। विवाहितोऽपि विरक्तोऽयं विंशतिवर्षावस्थायामेव संन्यासी भूत्वा षण्मासं यावत् समाधिस्थः योगसाधनामकरोत्। तेषामुपदेशाः सरलाः प्रभावपूर्णाश्चासन्। जनाः परस्परं सहिष्णुतां प्रदर्शयेयुः। दरिद्रनारायणस्य सेवा वस्तुतः परमेश्वरसेवा वर्तते। स्वामिविवेकानन्दः तेषां प्रमुखः शिष्यः आसीत्। श्रीरामकृष्णपरमहंसः परमास्तिकः कालिभक्तः दरिद्राणामुद्धारकः सिद्धपुरुषश्च आसीत्।

### (ख) भाषाक्रीडा

सर्वे बालकाः मण्डलनिर्माणं करिष्यन्ति। शिक्षकः मध्ये स्थित्वा प्रत्येकं बालकम् आदिशति यत् एकेन श्वासेन महापुरुषाणां नामानि वदत। एवमेव सर्वेषां बालकानां क्रमः आगमिष्यति। यः बालकः एकेन श्वासेन सर्वाधिकानि नामानि वदति सः विजेता भवति।

### (ग) भाषाविस्तारः

**दा (देना) लङ् लकारः (भूतकाल)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अददात् | अदत्ताम् | अददुः |
| मध्यमपुरुषः | अददाः | अदत्तम् | अदत्त |
| उत्तमपुरुषः | अददाम् | अदद्व | अदद्म |

**क्री (खरीदना) लङ् लकार (भूतकाल)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अक्रीणीत् | अक्रीणीताम् | अक्रीणन् |
| मध्यमपुरुषः | अक्रीणाः | अक्रीणीतम् | अक्रीणीत |
| उत्तमपुरुषः | अक्रीणाम् | अक्रीणीव | अक्रीणीम |



www.rajteachers.com

## श्रु ( सुनना ) लङ्. लकार

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अशृणोत् | अशृणुताम् | अशृण्वन् |
| मध्यमपुरुषः | अशृणोः | अशृणुतम् | अशृणुत |
| उत्तमपुरुषः | अशृणवम् | अशृणुव | अशृणुम |

## ज्ञा ( जानना ) लङ्. लकार

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजानात् | अजानीताम् | अजानन् |
| मध्यमपुरुषः | अजानाः | अजानीतम् | अजानीत |
| उत्तमपुरुषः | अजानाम् | अजानीव | अजानीम |


www.rajteachers.com

# सुभाषितानि



पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति शस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः ।। १ ।।

भवन्ति नम्रास्तरवः फलोद्गमैः, नवाम्बुभिर्भूरि विलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः, स्वभाव एवैष परोपकारिणाम् ।। २ ।।



पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।३ ।।

यः प्रीणयेत् सुचरितैः पितरं स पुत्रो, यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
यन्मित्रमापदि सुखे च समक्रिय एव, एतत्त्रयं जगति पुण्यकृतो लभन्ते ।।४ ।।



उदेति सविता रक्तो, रक्तश्चास्तमये तथा ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ।। ५ ।।

जननी जन्मभूमिश्च, जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव, जकाराः पञ्च दुर्लभाः ।। ६ ।।



गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि, पदमेकं न गच्छति ।। ७ ।।

न चौरहार्यं न च राजहार्यं, न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं, विद्याधनं सर्वधनं प्रधानम् ।।८ ।।

अल्पानामपि वस्तूनां, संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ।।९ ।।

उत्सवे व्यसने प्राप्ते, दुर्भिक्षे शत्रुसङ्कटे ।
राजद्वारे श्मशाने च, यस्तिष्ठति स बान्धवः ।। १० ।।



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| नद्यः | सरिताः | नदियाँ |
| शस्यं | अन्नम् | अन्न को |
| वारिवाहाः | मेघाः | बादल |
| सतां | सज्जनानाम् | सज्जनों का |
| विभूतयः | सम्पदः | सम्पत्तियाँ |
| तरवः | पादपाः | वृक्ष |
| फलोद्गमैः | फलोत्पत्तिभिः | फल लगने से |
| भूरि | अत्यधिकम् | बहुत अधिक |
| घनाः | मेघाः | बादल |
| अनुद्धताः | विनम्राः | विनम्र |
| निवारयति | दूरी करोति | हटाता है |
| योजयते | नियोजयते | जोड़ता है |
| आपद्गतं | विपत्तिकाले | संकट के समय |
| जहाति | त्यजति | छोड़ता है |
| ददाति | यच्छति | देता है |
| लक्षणम् | पहचानचिह्नानि | लक्षण |
| सन्तः | सज्जनाः | सन्तों ने |
| प्रीणयेत् | प्रसन्नं करोति | प्रसन्न करता है |
| भर्तुः | स्वामिनः | पति |
| कलत्रम् | भार्या | पत्नी |
| आपदि | विपत्तिकाले | संकट के समय |
| समक्रियः | समव्यवहारः | समान व्यवहार वाला |
| पुण्यकृतो | पुण्यात्मा | पुण्यशाली |
| रक्तः | ताम्रवर्णः | लाल रंग का |
| महताम् | महाजनाम् | महापुरुषों का |


www.rajteachers.com

| | | |
|---|---|---|
| याति | गच्छति | जाती है |
| वैनतेयः | गरुडः | गरुड़ |
| जननी | अम्बा | माँ |
| जन्मभूमिः | जन्मस्थानम् | जन्मस्थान |
| जाह्नवी | भागीरथी | गंगा |
| हार्यं | चोरणीयम् | चुराने योग्य |
| भाज्यं | विभाजनं | बाँटना |
| भारकारि | भारस्वरूपा | भार स्वरूप |
| वर्धते | वृद्धिं प्राप्नोति | बढ़ता है |
| संहतिः | सङ्गठनम् | संगठन |
| तृणगुणत्वमापन्नैः | अल्पतृणानि मिलित्वा | छोटे –छोटे तिनके मिलकर |
| दन्तिनः | गजः | हाथी |
| उत्सवे | उत्सवसमये | उत्सव के अवसर पर |
| व्यसने प्राप्ते | सङ्कट काले | विपत्ति के समय |
| दुर्भिक्षे | अकालसमये | अकाल के समय |
| राजद्वारे | राज्ञः द्वारे | राजा के द्वार पर |
| श्मशाने | शवदाहस्थाने | श्मशान में |
| बान्धवः | सुहृदः | मित्र |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

नद्यः नादन्ति वारिवाहाः नम्रास्तरवः नवाम्बुभिर्भूरि अनुद्धताः

निगूहति यद्भर्तुरेव एवास्तमेति शतान्यपि भातृभाज्यं यस्तिष्ठति

सन्मित्रलक्षणमिदं तृणैर्गुणत्वमापन्नैः।



www.rajteachers.com

२. **अधोलिखितप्रश्नानाम् उत्तराणि वदत -**

(क) स्वयमेव अम्भः के न पिबन्ति?

(ख) उदयकाले सवितुः वर्णः कीदृशः ?

(ग) सर्वधनं प्रधानम् किं ?

(घ) तृणैः गुणत्वमापन्नैः के बध्नन्ते ?

(ङ) मित्रं कस्मात् निवारयति ?

(च) कः श्रेष्ठः पुत्रः ?

## लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत -**

(क) फलोद्गमैः वृक्षाः कथं भवन्ति ?

(ख) सम्पत्तौ च विपत्तौ च केषाम् एकरूपता ?

(ग) सन्मित्रं कुत्र योजयते ?

(घ) का श्रेष्ठा भार्या ?

(ङ) चौरहार्यं किं नास्ति ?

२. **अधोलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत -**

(क) स्वयं फलानि के न खादन्ति ?

(ख) परोपकारिणां स्वभावः कीदृशः भवति ?

(ग) पञ्च जकाराः के सन्ति ?

(घ) सन्मित्रलक्षणं के प्रवदन्ति ?

(ङ) के त्रयं जगति पुण्यकृतो लभन्ते ?

(च) केषां संहतिः कार्यसाधिका ?

३. **रिक्तस्थानस्य पूर्तिं कुरुत -**

(क) ................................ ........... सतां विभूतयः।

(ख) अनुद्धता सत्पुरुषाः ................................ ..... ।

(ग) सन्मित्रलक्षणमिदं ................................ .. सन्तः।

(घ) गच्छन् पिपीलिको याति योजनानां ........................।



www.rajteachers.com

(ङ) विद्या धनं सर्वधनम् ............................. .....।

(च) ........................... वस्तुनां संहतिः कार्यसाधिका।

(छ) यस्तिष्ठति स ............................. ...........।

४. **अधोलिखितानां शब्दानां पर्यायवाची शब्दान् लिखत -**

**यथा-** अम्भः - जलम्

(क) तरुः - ....................

(ख) सविता - ....................

(ग) जाह्नवी - ....................

(घ) जनकः - ....................

(ङ) जननी - ....................

(च) दन्तिनः - ....................

(छ) मित्रं - ....................

५. **अधोलिखितशब्दानां सन्धिविच्छेदं कुरुत -**

**यथा -** नाम्भः - न + अम्भः

(क) नवाम्बुभिः - .................. + ..................

(ख) परोपकाराय - .................. + ..................

(ग) फलोद्गमैः - .................. + ..................

(घ) एवैषः - .................. + ..................

(ङ) शतान्यपि - .................. + ..................

(च) पापान्निवारयति - .................. + ..................

(छ) भर्तुरेव - .................. + ..................

(ज) नम्रास्तरवः - .................. + ..................

(झ) यस्तिष्ठति - .................. + ..................



www.rajteachers.com

६. अधोलिखितपदानां धातुं लकारं पुरूषं वचनं च लिखत –

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदाहरण – | पिबन्ति | पा | लट् | प्रथमः | बहुवचनम् |
| (क) | खादन्ति | ............ | ............ | ............ | ............ |
| (ख) | भवन्ति | ............ | ............ | ............ | ............ |
| (ग) | करोति | ............ | ............ | ............ | ............ |
| (घ) | ददाति | ............ | ............ | ............ | ............ |
| (ङ) | वदन्ति | ............ | ............ | ............ | ............ |
| (च) | लभन्ते | ............ | ............ | ............ | ............ |
| (छ) | तिष्ठति | ............ | ............ | ............ | ............ |



www.rajteachers.com

द्वादशः पाठः १२

# सूर्यो न तु तारा

## ( तुमुन् प्रत्ययः )

आङ्ग्लशासने तत्कालीनः वायसरायः लार्डकर्जनः सम्राट्एडवर्डसप्तमस्य राज्यारोहणावसरे सर्वान् भारतीयभूपान् समारोहे सम्मेलितुं देहलीम् आहूतवान्। मेदपाटस्य महाराणा फतेहसिंहोऽपि तत्र गच्छति स्म। तदा शाहपुरा वास्तव्यः ठाकुरकेसरीसिंहबारहठः "चेतावणी रा चूङ्गट्या" विलिख्य कथं प्रेषयति इति वयं नाटकरूपेण पठामः।



(रङ्गमञ्चे केसरीसिंहबारहठः गम्भीरमुद्रायाम् आसन्दम् अध्यास्ते। लघुबालकः कुँवरप्रतापः सहसा प्रविशति)

**कुँवरप्रतापः** – तात! माता मह्यं भुशुण्डीं न ददाति ।

(केसरीसिंहः तथैव गम्भीरमुद्रया चिन्तयति)

**कुँवरप्रतापः** – मातरं वदतु तात! सा मह्यं भुशुण्डीं न ददाति ।

(ततः माता माणिककँवरः प्रविशति)

**माणिककँवरः** – अत्र कोलाहलं मा करोतु कुमार! बहिः चत्वरे अस्ति, स्वीकृत्य क्रीडतु।

**कुँवरप्रतापः** – (प्रसन्नो भूत्वा) शोभनं मातः! गच्छामि। (सः धावन् निर्गच्छति)

**माणिककँवरः** – (केसरीसिंहं प्रति) किमर्थम् अद्य अतीव गम्भीरो दृश्यते ?

**केसरीसिंहः** – हूँ .... ! राष्ट्रविषये चिन्तयामि। किं भविष्यति अग्रे देशस्य ? महाराणा फतेहसिंहः देहल्यां लार्ड कर्जनस्य समारोहे भागं **ग्रहीतुं** गमिष्यति। मेदपाटस्य गौरवं विनष्टं भविष्यति।

**माणिककँवरः** – (आश्चर्येण) किम् ?

**केसरीसिंहः** – (उच्छ्वासेन) आम् । (ततः प्रविशति सेवकः)

**सेवकः** – ( प्रणमति ) खरवायाः रावगोपालसिंहेन सह केचन अतिथयः **द्रष्टुम्** इच्छन्ति भवन्तम्।

**केसरीसिंहः** – प्रेषयतु तावत्। (सेवकेन सह माणिककँवरः निर्गच्छति) (ततः प्रविशन्ति ठाकुरभूरसिंहः, ठाकुरकरणसिंहः खरवायाः रावगोपालसिंहश्च)

**भूरसिंहः** – वन्दे मातरम्।

**केसरीसिंहः** – (उत्थाय सर्वेषां स्वागतं कुर्वन्) स्वागतं भवताम्। उपविशन्तु। (सर्वे उपविशन्ति)

**करणसिंहः** – महाराणा फतेहसिंहः ढिल्लिकापुरीं (देहलीं) गच्छति इति जानाति किम् ?

**केसरीसिंहः** – आम्, सर्वं जानामि ।

**भूरसिंहः** – मेदपाटस्य सूर्यः अस्तं **गन्तुम्** इच्छति ।

**गोपालसिंहः** – अस्माकं दुर्भाग्यमस्ति यत् मेदपाटस्य महाराणा देहल्यां लार्डकर्जनतः भारतनक्षत्रम् (स्टार ऑफ इण्डिया ) इत्युपाधिं **प्राप्तुं** गच्छति।

**करणसिंहः** – सः तु साक्षात् ''हिन्दुआ सूरजः'' ( हिन्दुस्थानस्य सूर्यः ) अस्ति। ( बारहठं प्रति) निवारयतु महोदय ! निवारयतु।

**केसरीसिंहः** – (क्रोधेन) अहं कथं **निवारयितुं** शक्नोमि। राजानः तु ......................।

**करणसिंहः** – भवान् तस्य सचिवः आसीत्। तस्य व्यवहारं सम्यक् जानाति ।

**भूरसिंहः** – अतः भवान् एव विचारयतु ठाकुरकेसरीसिंह ! येन महाराणा विरमेत् । मेदपाटस्य प्रतिष्ठां च संरक्षेत्।

**करणसिंहः** – यदुष्णीषम् एकलिङ्गं विहाय कुत्रापि न नमति, तद् आङ्ग्लानां पादयोः नंस्यति। कथं नास्मान् पीडयिष्यति ?


www.rajteachers.com

**गोपालसिंहः** – (क्रोधेन) हा धिग् अस्मान् ।

**केसरीसिंहः** – एतत् स्मृत्वैव मम सर्वाणि अङ्गानि ज्वलन्ति। (क्रोधेन) कः **बोधयितुं** समर्थः एतान् नृपान् ?

**भूरसिंहः** – भवान् महोदय! भवतः वाचि अपूर्वा शक्तिरस्ति। लेखन्यां साक्षात् सरस्वती अस्ति। (उत्साहेन) रचयतु अद्वितीयं काव्यं यत्सर्वं दैन्यं **नाशयितुं** समर्थः भवेत्।

**केसरीसिंहः** – (क्रोधेन प्रकम्पितैः अङ्गैः लेखनीं कर्गदं च स्वीकृत्य ) एवमस्ति तर्हि लिखामि अद्वितीयं काव्यम्। (कर्गदे किमपि **लेखितुं** प्रवृतः। अनन्तरं पत्रं हस्ते स्वीकृत्य) एतानि सन्ति सोरठाछन्दसि "चेतावणी रा चूङ्गट्या" सञ्ज्ञितानि त्रयोदशपद्यानि। वाचयति –

येन दत्तानि दानानि शिरसाङ्गानि कृतानि वै ।
किमादातुमसौ दानं लोभाकृष्टो भवत्यहो ।।१ ।।

पश्यति भारतो भूयान् स्नेहेन यं रविं प्रति ।
तारकमिव तं दृष्टवा दीर्घं उच्छ्वसिष्यति ।।२ ।।

कः प्रापयिष्यति महाराजम्

**गोपालसिंहः** – (उत्साहेन) अहं प्रापयिष्यामि। (गृह्णाति)

**भूरसिंहः** – तर्हि शृणोतु। इदानीं साक्षात् सरेडी रेलयानस्थानकं गच्छतु। रेलयानं तत्र विरमति। तत्रैव महाराणां प्रापयतु एतत् पत्रम्।

**गोपालसिंह** – अस्तु, गच्छामि।

**करणसिंहः** – शुभास्ते पन्थानः सन्तु (गोपालसिंहः निर्गच्छति)

**भूरसिंहः** – अस्तु वयमपि चलाम। (सर्वे निर्गच्छन्ति)

(**सूचकः** – महाराणा फतेहसिंहः, तानि पद्यानि प्राप्य पठित्वा च आत्मगौरवमनुभूतवान् । सः अचिन्तयत् एतानि पद्यानि यदि उदयपुरे प्राप्तानि स्युः चेद् अहं ततःप्रस्थानम् एव न कृतवान् स्याम्। इति विचार्य १९०३ तमे ख्रिस्ताब्दे ढिल्लकां (देहलीं) तु अगच्छत् किन्तु तस्मिन् समारोहे अनुपस्थितो भूत्वा प्रत्यावर्तत । तेन क्रान्तिकारिषु विलक्षणोत्साहः समचरत्।)

**( यवनिकापातः )**



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| आसन्दे | काष्ठासने | कुर्सी पर |
| अध्यास्ते | उपविशति | बैठा है |
| भुशुण्डीं | आग्नेयास्त्रम् | बन्दूक को |
| मेदपाटस्य | मेवाडस्य | मेवाड़ का |
| द्रष्टुम् इच्छन्ति | मेलितुमिच्छन्ति | मिलना चाहते हैं। |
| विरमेत् | तिष्ठेत् | रुके |
| उष्णीषम् | शिरस्कम् | पगड़ी |
| नत्वा | अवनम्य | झुक कर के |
| वाचि | वाण्यां | वाणी में |
| अपूर्वा | अद्वितीया | अनोखी |
| सञ्ज्ञितानि | नामकानि | नामक |
| पन्थानः | मार्गाः | मार्ग |
| सन्तु | भवन्तु | होवे |
| स्मृत्वैव | स्मरणं कृत्वा एव | याद करके ही |
| प्रत्यावर्तत | पुनः आगच्छत् | लौट गये |
| ख्रिस्ताब्दे | ईशवीयाब्दे | ईस्वी सन् में |
| समचरत् | सञ्चारम् अकरोत् | सञ्चरण हुआ |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानानाम् उच्चारणं कुरुत –**

भुशुण्डीं, गम्भीरमुद्रया, विनष्टम्, मेदपाटस्य, नत्वा,
भारतनक्षत्रम्, यदुष्णीषम्, प्रत्यावर्तत्, स्मृत्वैव, ख्रिस्ताब्दे

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत–**

(क) गम्भीरमुद्रया कः चिन्तयति ?
(ख) कुँवरप्रतापः किं याचते ?
(ग) महाराणा फतेहसिंहः कुत्र गच्छति ?
(घ) ''अहं प्रापयिष्यामि'' इति कः उक्तवान् ?


www.rajteachers.com

## लिखितप्रश्नाः

**३. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत् -**

(क) कुँवरप्रतापस्य माता का आसीत् ?

(ख) ''अहं कथं निवारयितुं शक्नोमि'' इति कः उक्तवान् ?

(ग) कस्य लेखन्यां साक्षात् सरस्वती अस्ति ?

(घ) रेलयानं कुत्र विरमति ?

(ङ) केषु विलक्षणोत्साहः समचरत् ?

**४. अधोलिखितानां प्रश्नानाम् उतराणि एकवाक्येन लिखत -**

(क) केसरीसिंहबारहठः कुत्र अध्यास्ते ?

(ख) ''मेदपाटस्य सूर्यः'' पाठे कस्य कृते प्रयुक्तः ?

(ग) ''भवान् तस्य सचिवः आसीत्'' इति कः कं प्रति कथयति ?

(घ) केसरीसिंहः किम् अद्वितीयं काव्यं रचितवान् ?

(ङ) महाराणाफतेहसिंहः कदा देहलीम् अगच्छत् ?

**५. अधोलिखितवाक्यानां सम्मुखे कोष्ठके सत्यम् असत्यं वा लिखित् -**

(क) कुँवरप्रतापसिंहबारहठः केसरीसिंहस्य पुत्रः आसीत्। (      )

(ख) फतेहसिंहः हिन्दुस्थानस्य महाराणा आसीत्। (      )

(ग) 'चेतावणी रा चूङ्ट्या' इति काव्यं महाराणा फतेहसिंहः अरचयत्। (      )

(घ) एडवर्डसप्तमस्य राज्यारोहणावसरे समारोहः आयोजितः। (      )

(ङ) १९०३ तमे ख्रिस्ताब्दे महाराणा देहलीं न गच्छति। (      )

**६. निर्देशानुसारं रिक्तस्थाने क्रियायाः रूपं लिखत -**

(क) तस्य पितुः नाम कृष्णसिंहः ...................... । (अस् धातुः लङ् लकारः)

(ख) महाराणा फतेहसिंहः देहलीं ... . .................. । (गम् धातुः लृट्लकारः)

(ग) अहं राष्ट्राय कारागृहे ............................ । (गम् धातुः लट्लकारः)

(घ) सर्वे छात्राः अद्य .................................. । (पठ् धातुः लोट् लकारः)

(ङ) त्वं नित्यं योगासनं ................................ । (कृ धातुः विधिलिङ् लकारः)



www.rajteachers.com

७. **सुमेलनं कुरुत -**

| | | | |
|---|---|---|---|
| (क) | महाराणा फतेहसिंहः | (अ) | कुँवरप्रतापसिंहः |
| (ख) | गोपालसिंहः | (आ) | मेदपाटः |
| (ग) | ठाकुरकेसरीसिंहबारहठः | (इ) | देहली |
| (घ) | लघुबालकः | (ई) | खरवा |
| (ङ) | कर्जनः | (उ) | शाहपुरा |


## योग्यता-विस्तारः

### ( क ) पाठविस्तारः

**चेतावणी रा चूङ्ग्या** - चेतावणी रा चूङ्ग्या सोरठाछन्दसि त्रयोदशपद्यानि सन्ति। एतेषां माध्यमेन केसरीसिंहबारहठः महाराणाफतेहसिंहं स्वाभिमानस्य, स्ववंशपरम्परायाः मेदपाटस्य गौरवस्य च अभिज्ञानं कारितवान्। तेषु एकम् उदाहरणम् अधोलिखितम् अस्ति -

**''पग पग भम्या पहाड़, धरा छोड़ राख्यो धरम ।**
**महाराणा र मेवाड़, हिरदे बस्या हिन्द रे ।।''**

अर्थात् महाराणा (प्रतापः) स्वधर्मं रक्षणाय राजप्रासादान् त्यक्त्वा वनेषु पर्वतेषु च अभ्रमत्। तेन कारणेन महाराणा मेवाडश्च हिन्दुस्थानस्य जनमनसि प्रतिष्ठितः।



**केसरीसिंहबारहठः** - स्वनामधन्यस्य केसरीसिंहबारहठस्य जन्म १८७२ तमे ख्रिस्ताब्दे भीलवाडाजनपदे शाहपुरानगरस्य समीपस्थे देवखेडानामके ग्रामे अभवत्। एतस्य पितुः नाम ठाकुरकृष्णसिंहबारहठः आसीत्। युवावस्थायामेव मेदपाटस्य महाराणाफतेहसिंहस्य सचिवः अभवत्। सः सम्पूर्णं कुटुम्बं स्वाधीनतायै समर्पितवान्। रावगोपालसिंहः खरवा, अर्जुनलालसेठी, दामोदरदासराठी प्रभृतीनां सहयोगेन ''अभिनवभारत-समिति'' नामकं सङ्गठनं स्थापितवान्। एषः १९४१ तमे ख्रिस्ताब्दे दिवङ्गतः।



**कुँवरप्रतापसिंहबारहठः** - कुँवरप्रतापसिंहबारहठः केसरीसिंहबारहठस्य पुत्रः आसीत्। एतस्य जन्म १८९३ ख्रिस्ताब्दे अभवत्। स बनारसषड्यन्त्राभियोगे बरेली कारागृहे निगडितः। तत्र बहुनि कष्टानि सोढ्वा अपि क्रान्तिकारिणां विषये किमपि रहस्यं न प्रकटितवान्। अमानुषीयप्रताडनात् सः पञ्चविंशे वयसि १९१८ तमे ख्रिस्ताब्दे सर्वाणि बन्धनानि त्रोटयित्वा दिवङ्गतः।



www.rajteachers.com



**जोरावरसिंहबारहठः** - केसरीसिंहबारहठस्य द्वौ भ्रातरौ किशोरसिंहो जोरावरसिंहश्च आस्ताम्। जोरावरसिंहस्य जन्म सितम्बरमासस्य द्वादशे दिनाङ्के १८८३ तमे ख्रिस्ताब्दे सञ्जातम्। सः रासबिहारी बोसेन सह मिलित्वा देहल्यां चान्दनीचौकम् इत्याख्ये स्थाने लार्डहार्डिंगस्योपरि विस्फोटास्त्रम् (बम) क्षिप्तवान्। आङ्ग्लसर्वकारः बहुप्रयासमकरोत् तथापि सः हस्तगतः न अभवत्। जीवनस्योत्तरार्द्धे अमरादासबैरागी नाम्ना राजस्थानमालवयोः वनाच्छादितेषु पर्वतीयप्रदेशेषु निवसन् जनजागरणाय बहूनि प्रयत्नानि कुर्वन् १९३९ तमे ख्रिस्ताब्दे एषः महान् वीरः पञ्चतत्वमवाप।

## (ख) भाषा-क्रीडा

शिक्षकः पाठे आगतानां क्रान्तिकारिणां नामानि लघु लघु कर्गदखण्डेषु लिखित्वा पृथक् पृथक् गोलिकानिर्माणं करिष्यति। ततः एक छात्रः छात्रा वा आगत्य तासु एकां गोलिकां स्वीकरिष्यति उद्घाट्य द्रक्ष्यति च। तस्मिन् कर्गदे यस्य क्रान्तिकारिणः नाम लिखितम् अस्ति तस्य जीवनस्योपरि सः छात्रः संस्कृतभाषायां वाक्यम् एकं वदिष्यति। कस्य अपि वाक्यस्य पुनरुक्तिः न भवेत्। यः वक्तुं न शक्नोति सः बहिः भवति। एवं सर्वेषां क्रमः आगमिष्यति। अन्ते यः शिष्टः सः विजेता भविष्यति।

## (ग) भाषा-विस्तारः

शिक्षकः - बालकः पाठं पठति। बालकः विद्यालयं गच्छति।

बालकः पाठं **पठितुं** विद्यालयं गच्छति।

अन्यानि अपि रूपाणि जानीम।

**यथा-**

| वर्तमानकालिकरूपम् | तुमुन्प्रत्ययान्तरूपम् | प्रकृतिः | + | प्रत्ययः |
|---|---|---|---|---|
| पठति | पठितुम् | पठ् | + | तुमुन् |
| लिखति | लेखितुम् | लिख् | + | तुमुन् |
| खादति | खादितुम् | खाद् | + | तुमुन् |
| पतति | पतितुम् | पत् | + | तुमुन् |
| क्रीडति | क्रीडितुम् | क्रीड् | + | तुमुन् |
| मिलति | मेलितुम् | मिल् | + | तुमुन् |
| नयति | नेतुम् | नी | + | तुमुन् |



www.rajteachers.com

| | | | | |
|---|---|---|---|---|
| भवति | भवितुम् | भू | + | तुमुन् |
| करोति | कर्तुम् | कृ | + | तुमुन् |
| चिनोति | चेतुम् | चि | + | तुमुन् |
| शृणोति | श्रोतुम् | श्रु | + | तुमुन् |
| पश्यति | द्रष्टुम् | दृश् | + | तुमुन् |
| पिबति | पातुम् | पा | + | तुमुन् |
| ददाति | दातुम् | दा | + | तुमुन् |

संयोज्य वाक्यानि वदत लिखत च । **यथा –**

**शिक्षकः– रमा वृक्षं पश्यति । उद्यानं गच्छति ।** **छात्राः– रमा वृक्षं द्रष्टुम् उद्यानं गच्छति।**

| **शिक्षकः** | **छात्राः** |
|---|---|
| भगिनी गृहकार्यं करोति। गृहं गच्छति । | ...................................। |
| माता पूजां करोति। मन्दिरं गच्छति। | ...................................। |
| पर्यटकः हवामहलं पश्यति । जयपुरं गच्छति। | ...................................। |
| अहं संस्कृतवार्तां शृणोमि। दूरदर्शनम् उद्घाटयामि। | ...................................। |
| मृगः जलं पिबति । नदीं गच्छति । | ...................................। |
| रुग्णः स्वस्थः भवति। औषधं खादति । | ...................................। |
| भ्राता अध्ययनं करोति। पुस्तकम् उद्घाटयति। | ...................................। |
| सुधांशुः स्वस्थः भवति। व्यायामं करोति । | ...................................। |




www.rajteachers.com

त्रयोदशः पाठः
१३

# संहतिः श्रेयसी पुंसाम्

( क्त, क्तवतु प्रत्ययः )

(मिथिलाक्षेत्रे सामान्यजनाः अपि 'गोनू झा' नामकस्य पण्डितस्य कथाः जानन्ति। एतासु कथासु तस्य कुशाग्रबुद्धेः परिचयो भवति। अस्मिन् पाठे पारिवारिकविभाजनस्योपरि व्यंग्यः कृतोऽस्ति।)



एकस्मिन् कृषकपरिवारे भ्राताद्वयम् आसीत् सोमदत्तः प्रेमदत्तश्च। ज्येष्ठः सोमदत्तः चतुरः आसीत् किन्तु कनिष्ठः प्रेमदत्तस्तु सरलः आसीत्। तयोः पार्श्वे एकं कम्बलम् एका च महिषी आसीत्। एकदा तयोर्मध्ये एकः अनुबन्धः अभवत्।

अनुबन्धानुसारेण प्रेमदतः दिवसे क्षेत्रे कार्यं करिष्यति सोमदत्तः रात्रौ च। एवमेव दिवसे कम्बलस्य प्रयोगः अपि कनिष्ठः एव करिष्यति, सोमदत्तस्तु रात्रौ एव। एवं विचारयन्तौ तौ महिषिविषयेऽपि अनुबन्धः कृतवन्तौ। तेन महिष्याः शरीरस्य पूर्वार्धभागस्य स्वामी प्रेमदत्तः अभवत् सोमदत्तस्तु पश्चादर्धभागस्य स्वामी। अनुबन्धनात् पश्चात् प्रेमदत्तस्तु क्षेत्रे एकस्मिन् भागे कम्बलं स्थाप्य दिवसपर्यन्तं परिश्रमं करोति स्म। महिषीं भोजनादिना सेवते स्म। सोमदत्तस्तु कम्बलेन शरीरमाच्छाद्य रात्रौ क्षेत्रे शयनमेव करोति स्म। प्रातः-सांयकाले च दुग्धं प्राप्नोति। इत्थं सर्वदा प्रेमदत्तस्तु वञ्चितो भवति स्म।



स एकदा स्वमित्रं 'गोनू झा' नामकं पण्डितं पृष्टवान् - भोः ! किं करोमि ? सदा वञ्चितः अस्मि। गोनू झा प्रेमदत्ताय समुचितं परामर्शं दत्तवान्। गृहं गत्वा सः मित्रस्य कथनानुसारेण कम्बलं प्रक्षालनार्थम् अपराह्ने सूर्यास्तसमये जले स्थापितवान्। सायङ्काले सोमदत्तः पृष्टवान् कम्बलं कुत्रास्ति ? "तत् मलिनम्



www.rajteachers.com

जातम्। अतः मया प्रक्षालितम्।'' कम्बलं विना एव सोमदत्तः रात्रिशयनं कृतवान्।

अनन्तरं सः महिषीं दिवसे भोजनेन वञ्चितां कृतवान्। महिषी अतीव कुपिता। ततः सः दोहनकालेऽपि दण्डेन पूर्वार्द्धभागं तां ताडितवान् । अतः महिषी कुपिता भूत्वा दोहनकाले पादप्रहारेण सोमदत्तं ताडितवती । सः चतुरः क्रोधितः सम्भूय अकथयत् – ''भोः मूर्ख ! किं करोषि ? महिष्याः पूर्वार्धस्वामी प्रेमदत्तः उक्तवान् – ''अहं अस्याः शरीरस्य पूर्वार्धभागस्य स्वामी। यन्मे रोचते तदेव करोमि। अनेन तव किम्?'' इति भ्रातुः कथनं श्रुत्वा सोमदत्तः मूकः जातः। स्वधूर्ततायाः इदं फलं ज्ञात्वा लज्जितः च अभवत्।



ततः स पुनः महिषिविभाजनं निरर्थकं कथयन् क्षेत्रे कम्बले महिष्याः भोजनदाने दुग्धग्रहणे च उभौ समानौ स्वामिनौ इति स्वीकृतवान्। तेन द्वयोः लाभः जातः।

अतः परस्परं सदैव सहयोगेन सामञ्जस्येन च कार्यं करणीयम्। परिवारे स्वार्थसिद्धिपूर्वकं निरर्थकं विभाजनं न शोभते।





www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| एकदा | एकवारम् | एक बार |
| पूर्वार्धम् | प्रथमार्धम् | पहला आधा भाग |
| कुशाग्रः | तीक्ष्णः | तेज |
| कम्बलम् | ऊर्णकम् | कम्बल |
| प्रयोगः | उपयोगम् | उपयोग |
| वञ्चितः | विरहितः | ठगा गया |
| दोहनकाले | दुग्धग्रहणसमये | दूहने के समय |
| ताडनम् | प्रहारम् | मारना |
| मे | मह्यम् | मुझे |
| मूकः | तूष्णीम् | चुप रहना |
| जातः | अभवत् | हो गया |
| ततः | तत्पश्चात् | उसके बाद |
| निरर्थकम् | अनुपयोगी | बेकार |
| विभाजनम् | भागकरणम् | बँटवारा |

## अभ्यासः

### मौखिक प्रश्नाः

१. **अधोलिखितानां पदानां शुद्धोच्चारणं कुरुत –**

| | | | | |
|---|---|---|---|---|
| स्वबौद्धिकम् | कुशाग्रबुद्धेः | भ्राताद्वयम् | पार्श्वे | तयोर्मध्ये |
| अनुबन्धः | विचारयन्तौ | स्थाप्य | भोजनादिना | वञ्चितः |
| प्रक्षालनार्थम् | उत्तरत | ताडितवान् | भूत्वा | पूर्वार्धम् |
| पादप्रहारेण | लज्जितश्च | सामञ्जस्येन | निरर्थकम् | विभाजनम् |

२. **गोनू झा नामकस्य पण्डितस्य अथवा तत्सदृशीम् अन्यां कथां श्रावयतु ।**



www.rajteachers.com

## लिखितप्रश्नाः

**१. अधोलिखितानि अशुद्धानि पदानि शुद्धानि कृत्वा लिखत –**

पार्श्वे महिस्याः आच्छद्य पादप्रहारेन भोजनदिना पृष्ट्वान्

**२. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

(क) तयोः पार्श्वे किं किं आसीत् ?

(ख) प्रेमदत्तः कीदृशः आसीत् ?

(ग) सोमदत्तः महिष्याः शरीरस्य कस्य भागस्य स्वामी ?

(घ) प्रेमदत्तस्य मित्रं कः आसीत् ?

(ङ) परिवारे किं न शोभते ?

(च) परस्परं कथं कार्यं करणीयम् ?

**३. मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत**

| पादप्रहारेण, समुचितम्, लज्जितः, सोमदत्तः, महिषी |
|---|

(क) तौ ........................ विषयेऽपि अनुबन्धः कृतवन्तौ।

(ख) ................................ तु पश्चादर्धभागस्य स्वामी।

(ग) गोनू झा प्रेमदत्ताय ........................ परामर्शं दत्तवान्।

(घ) महिषी कुपितौ भूत्वा सोमदत्त ................. ताडितवती।

(ङ) स्वधूर्ततायाः इदं फलं ज्ञात्वा सः ................. अभवत्।

**४. रेखाङ्कितपदान् आधृत्य प्रश्ननिर्माणं कुरुत –**

**उदाहरणम् – एकदा तयोर्मध्ये एकः अनुबन्धः अभवत्।**

प्रश्नः – एकदा कयोः मध्ये एकः अनुबन्धः अभवत् ?

(क) एकस्मिन् कृषकपरिवारे भ्राताद्वयम् आसीत् ।

(ख) एकदा सः स्वमित्रं 'गोनू झा' नामकं पण्डितं पृष्टवान्।

(ग) सः कम्बलं प्रक्षालनार्थं जले स्थापितवान्।

(घ) स महिषीं भोजनेन वञ्चितां कृतवान्।

(ङ) सोमदत्तः मूको जातः।



www.rajteachers.com

५. **निम्नपदान् स्वीकृत्य वाक्यरचनां कुरुत -**

(क) पश्चात् .................................... ।

(ख) ततः ....................................... ।

(ग) सायङ्काले .................................. ।

(घ) सदा ........................................ ।

(ङ) इत्थम् ...................................... ।

६. **निम्नपदानां सन्धिं / सन्धिविच्छेदं वा कुरुत -**

| | | | | | |
|---|---|---|---|---|---|
| (क) | कम्बलमेकम् | = | ................. | + | ................. |
| (ख) | ................. | = | तयो: | + | मध्ये |
| (ग) | ................. | = | प्रेमदत: | + | तु |
| (घ) | विभाजनस्योपरि | = | ................. | + | ................. |
| (ङ) | पूर्वार्धम् | = | ................. | + | ................. |
| (च) | ................. | = | सदा | + | एव |

## योग्यता-विस्तारः

### ( क ) लेखकस्य संक्षिप्तपरिचयः



गोनू झा नामकस्य पण्डितस्य जन्म बिहारप्रान्तस्य मिथिलाक्षेत्रे सिंहवाडाप्रखण्डे भरौरानामग्रामे पञ्चशतं वर्षाणि पूर्वम् अभवत्। एतस्य पिता धार्मिकपुरुष: आसीत्। अत: गोनू अपि तादृश: धार्मिक: अभवत्। गोनू कालिकाया: परमोपासक: आसीत्। स: प्रत्युत्पन्नमति: परिहासप्रियश्चासीत्। स्वबुद्धिकौशलेन मिथिलासाम्राज्यस्य पदाधिकारी अभवत्। किंवदन्तिरूपेण तस्य अनेका: कथा: सामाजिकानां मानसम् आनन्दाप्लावितं कुर्वन्ति।

### ( ख ) गोनू - झा - पण्डितस्य अन्या कथा -

एकस्यां पूर्णिमायां रात्रौ गोनूपण्डितस्य गृहे केचन चौरा: प्रविष्टा:। तस्य भार्या अवदत् - "स्वामिन्! प्रतीयते यत् गृहाभ्यन्तरे चौरा: आगता:।" इति ।

पण्डित: चौरान् श्रावयन् उच्चै: अवदत् - "चिन्ता मास्तु! अहं सर्वं धनं अस्माकं क्षेत्रस्य गर्भे



www.rajteachers.com

स्थापितवान्। चौराः तत् धनं न प्राप्तुं शक्नुवन्ति।'' इति

पण्डितस्य वाणीं श्रुत्वा चौराः गृहात् निर्गत्य क्षेत्रम् अगच्छन्। ततः रात्रौ सम्पूर्णं क्षेत्रं कर्षितवन्तः। सूर्योदयात् पूर्वमेव पण्डितः क्षेत्रं गत्वा चौरान् सम्बोध्य अवोचत् – ''भवन्तः मम क्षेत्रं कर्षितवन्तः तत्कृते धन्यवादः। चौराः लज्जिताः भूत्वा ततः पलायिताः।

आगामिनी अमावस्यां रात्रौ चौराः पुनः गोनूपण्डितस्य गृहम् आगताः। जागृता पत्नी अवदत् – ''प्रतीयते अद्य पुनः चौराः प्रविष्टाः।'' इति

गोनू झा प्रत्युतरत – ''मा विभेषि। इदानीं तु मया धनं सुरक्षितस्थाने स्थापितम्।''

''कुत्र'' इति तस्य भार्या अपृच्छत्।

गोनू झा अवदत् – अहं धनं स्यूते स्थाप्य तं स्यूतं वृक्षस्य शाखायां लम्बितवान् अस्मि।

एतत् श्रुत्वा चौराः वृक्षमारुह्य स्यूतस्य अन्वेषणं कृतवन्तः । तेषु एकः वृक्षोपरि स्यूतं मत्वा मधुमक्षिकाणां छत्रे स्वहस्तं प्रावेशितवान्। मधुमक्षिकाः तेषामुपरि आक्रमणं कृतवत्यः। गोनू झा तत्रागत्य हसन् अवदत् – ''उपचारार्थम् औषधीं स्वीकरोतु'' इति।

चौराः भविष्ये गोनू झा पण्डितस्य गृहे चौरकार्यस्य विचारमेव त्यक्तवन्तः।

## (ग) प्रत्ययः

भूतकालिकक्रियायाः प्रकटीकरणार्थं क्त-क्तवतु प्रयोगोऽपि क्रियते। एतयोः प्रत्ययोः निर्मितशब्दस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

### क्तप्रत्ययः

| | पुँल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| गम्+क्त | गतः | गता | गतम् |
| लिख्+क्त | लिखितः | लिखिता | लिखितम् |
| दृश्+क्त | दृष्टः | दृष्टा | दृष्टम् |
| लभ्+क्त | लब्धः | लब्धा | लब्धम् |
| श्रु+क्त | श्रुतः | श्रुता | श्रुतम् |
| कृ+क्त | कृतः | कृता | कृतम् |
| दा+क्त | दत्तः | दत्ता | दत्तम् |
| पा+क्त | पीतः | पीता | पीतम् |
| नी+क्त | नीतः | नीता | नीतम् |



www.rajteachers.com

क्तप्रत्ययेन निर्मितपदानां रूपाणि पुँल्लिङ्गे रामवत् स्त्रीलिङ्गे लतावत् नपुंसकलिङ्गे फलवत् प्रचलन्ति।

## क्तवतुप्रत्ययः


| | पुँल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| गम्+क्तवतु | गतवान् | गतवती | गतवत् |
| लिख्+क्तवतु | लिखितवान् | लिखितवती | लिखितवत् |
| नम्+क्तवतु | नतवान् | नतवती | नतवत् |
| भू+क्तवतु | भूतवान् | भूतवती | भूतवत् |
| हस्+क्तवतु | हसितवान् | हसितवती | हसितवत् |
| रुच्+क्तवतु | रोचितवान् | रोचितवती | रोचितवत् |
| याच्+क्तवतु | याचितवान् | याचितवती | याचितवत् |
| क्री+क्तवतु | क्रीतवान् | क्रीतवती | क्रीतवत् |
| ज्ञा+क्तवतु | ज्ञातवान् | ज्ञातवती | ज्ञातवत् |


www.rajteachers.com

चतुर्दशः पाठः १४

# भारतीय कालगणना

## ( पूरणी संख्या )




कालचक्रं सततं प्रचलति। भारते कालविषयिनी गणना वैदिककालात् प्रचलिता अस्ति। अत्र विभिन्नाः संवत्सराः प्रचलिताः अभवन्। परम् अद्यत्वे व्यवहारे विक्रमसंवत् , शालिवाहन, शकसंवत्, ईसवीयसंवत् चेति संवत्सराः प्रमुखाः सन्ति। तत्र शकसंवत् अस्माकं राष्ट्रियसंवत् विद्यते। विक्रमसंवत् प्राचीनकालाद् - विशेषतः लोकव्यवहारे प्रचलति। ईसवीयसंवत् च अद्यत्वे राजकार्ये प्रायेण प्रयुज्यते। संवत्, संवत्सरः , वर्षं चेति शब्दाः पर्यायवाचिनः सन्ति। एकस्मिन् वर्षे वसन्तः, ग्रीष्मः , वर्षा, शरद् , हेमन्तः शिशिरश्चेति षड्ऋतवः भवन्ति।

एकस्मिन् वर्षे सूर्यः सप्तविंशति (27) नक्षत्रेषु परिभ्रमति। एतदनुसारमेव भारतीय वर्षस्य निर्माणम् भवति। द्वादशानां नक्षत्राणां पूर्णिमातिथेः अनुसारं द्वादशानां मासानां नामकरणं जातम्। सपादद्वि नक्षत्राणां मेलनं कृत्वा एकस्या राशेः निर्माणं भवति। सूर्यः एकमासे एकस्मिन् राशौ भ्रमति। द्वादशमासानां नामकरणं पूर्णिमातिथौ आगतस्य चान्द्रनक्षत्रस्य उपरि जातम्। यथा- चैत्र-चित्राम्, वैशाख-विशाखाम्, ज्येष्ठः-ज्येष्ठाम् आषाढः-पूर्वाषाढाम्, श्रावणः-श्रवणं, भाद्रपदः- भाद्रपदम्, आश्विनः-अश्विनीं, कार्तिकः-कृतिकां, मार्गशीर्षः-मृगशिरां, पौषः-पुष्यं, फाल्गुनः- फाल्गुनीमाश्रित्य विख्याताः।


www.rajteachers.com

१. **चैत्रमासः** – अस्मात् मासाद् एव विक्रमसम्वत् प्रारभ्यते। भगवतीदुर्गायाः उपासना, चैत्री चन्द्रः (सिन्धी समाजस्यपर्वः) भगवतः श्री रामचन्द्रस्य जन्मोत्सवश्च अस्मिन्नेव मासे आगच्छति।

२. **वैशाखमासः** – अस्मिन् मासे अक्षयतृतीया, बुद्धपूर्णिमा च आयातः। बहूनि माङ्गलिक-कार्याणि अप्यस्मिन् मासे भवन्ति।

३. **ज्येष्ठमासः** – अस्मिन् मासे निर्जला – एकादशी, वटसावित्री-व्रतपूजनम् अन्ये च माङ्गलिकाः उत्सवाः भवन्ति।

४. **आषाढमासः** – अस्मिन् मासे देवशयनी एकादशी, गुरूपूर्णिमा, भगवतः जगन्नाथस्य रथ यात्रादयः व्रतोत्सवाः भवन्ति।

५. **श्रावणमासः** – अस्मिन् मासे बहूनि- धार्मिकपर्वाणि यथा- हरियाली अमावस्या, श्रावणी तृतीया, श्रावणीकर्म रक्षाबन्धनं च आयोज्यन्ते।

६. **भाद्रपदमासः** – अस्मिन् मासे भगवतः श्रीकृष्णस्य जन्मोत्सवपर्वणः, वत्सद्वादश्याः, ऋषिपञ्चम्याः, गणेशोत्सवस्य, अनन्तचतुर्दश्याः आयोजनं भवति।

७. **आश्विनमासः** – अस्य मासस्य प्रथमपक्षे तर्पणादिकृत्यं भवति। द्वितीये पक्षे च दुर्गा देव्याः पूजा सर्वत्र भवति। क्षत्रियाणां शस्त्रादि पूजनार्थं विजयदशमी पर्वः शरदपूर्णिमा अपि अस्मिन् मासे भवति।

८. **कार्तिकमासः** – अस्मिन् मासे कर्कचतुर्थी, अहोई अष्टमी, धनत्रयोदशी, दीपावलीमहोत्सवः, गोवर्धनपूजा, भ्रातृद्वितीया देवोत्थायी एकादशी, कार्तिकपूर्णिमादीनि पर्वाणि समायान्ति ।

१०. **मार्गशीर्षमासः** – अस्मिन् मासे मोक्षप्रदा एकादशीव्रतमायाति ।

११. **पौषमासः** – अस्मिन् मासे पुत्रदा- एकादशी, मकरसङ्क्रान्तिः केरलादिप्रदेशस्य पोङ्गल इत्यादीनि पर्वाणि च भवन्ति ।

११. **माघमासः** – अस्मिन् मासे वसन्तपञ्चम्यां तिथौ विद्यादेव्याः सरस्वत्याः पूजनं महाकवि माघस्य जयन्ती माघ पूर्णिमा च भवन्ति ।

१२. **फाल्गुनमासः** – अस्मिन् मासे होलिकादहनम्, धूलिवन्दनं सम्वत्सरावसानं च भवति ।

एकस्मिन् मासे त्रिंशद् दिवसाः द्वौ पक्षौ च भवतः-शुक्लः कृष्णश्च। तत्र प्रत्येकं पक्षे पञ्चदश तिथयो भवन्ति। तत्र शुक्लपक्षान्ते पूर्णिमा कृष्णपक्षान्ते च अमावस्या भवति। तिथिनां नामानि एवं बोध्यानि



www.rajteachers.com

– प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावस्या चेति। एवं बृहस्पतिमाश्रित्य षष्टि संवत्सराणां चक्रः प्रवर्तते । चतुर्युगानामेकः महायुगः भवति। द्विसप्तति महायुगानाम् एकः मन्वन्तरः भवति। अधुना वैवस्वत मन्वन्तरस्य अष्टाविंशतितमो महायुगो प्रचलति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सततम् | निरन्तरम् | लगातार |
| व्यापकः | सर्वत्र | सब स्थानों पर |
| अद्यत्वे | सम्प्रति | आजकल |
| सपादद्वि | पादसहितं द्वि | सवा दो |
| आश्रित्य | अवधृत्य | आधार पर |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां पदानाम् उच्चारणं कुरुत –**

शक्नोति विद्वांसः संवत्सराः विक्रमसंवत् ईसवीयसंवत्

प्रयुज्यते सपादद्वि माङ्गलिकाः तर्पणादिकृत्यं पुष्यनक्षत्रस्य सङ्क्रान्तिः

२. **अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि वदत –**

(क) एकस्मिन् वर्षे कति मासाः भवन्ति ?

(ख) वसन्तपञ्चमी कस्मिन् मासे भवति ?

(ग) एकस्मिन् वर्षे कति ऋतवः भवन्ति ?

(घ) एकस्मिन् वर्षे सूर्यः कति नक्षत्रेषु परिभ्रमति ?



www.rajteachers.com

## लिखितप्रश्नाः

**१. लघूत्तरात्मक प्रश्नाः –**

(क) कालः कीदृशः अस्ति ?

(ख) वर्षशब्दस्य वाचकाः अन्ये शब्दाः के ?

(ग) नक्षत्राणां संख्या कति सन्ति ?

(घ) भारतीयमासानां पक्षयोः नामनी लिखत ?

**२. उचित शब्देन सह मेलनं कुरुतः –**

| (य) | (र) |
|---|---|
| (क) मासाः | (अ) एकम् |
| (ख) वर्षम् | (आ) पञ्चदश |
| (ग) ऋतवः | (इ) द्वादश |
| (घ) तिथयः | (ई) षट् |

**३. मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत –**

**राष्ट्रिय, गणना, त्रिंशद्, प्रचलति, सपादद्वि**

(क) कालविषयिनी ........................ वैदिकालात् प्रचलिता अस्ति ।

(ख) कालचक्रं सततं ................................................. ।

(ग) तत्र शकसंवत् अस्माकं ............................. संवत् विद्यते ।

(घ) ............... नक्षत्राणां मेलनं कृत्वा एकस्याः राशेः निर्माणं भवति ।

(ङ) एकस्मिन् मासे ................................... दिवसाः भवन्ति ।

**४. निम्नलिखितशब्दानां पर्यायवाची शब्दान् लिखत –**

(क) संवत्सरः – ........................ ।

(ख) सूर्यः – ........................ ।

(ग) वसन्तः – ........................ ।

(घ) माहः – ........................ ।

(ङ) चन्द्रः – ........................ ।



www.rajteachers.com

५. भारतीयमासानां तिथीनां च नामानि लिखत।

६. ऋतूणां नामानि लिखत।

## योग्यता-विस्तारः

**( १ ) द्वादशराशीणां नामानि -**

| | | | |
|---|---|---|---|
| १. मेषः | २. वृषभः | ३. मिथुनः | ४. कर्कः |
| ५. सिंहः | ६. कन्या | ७. तुला | ८. वृश्चिकः |
| ९. धनुः | १०. मकरः | ११.कुम्भः | १२. मीनः |

**( २ ) भारतीयाः षड्ऋतवः -**

| | | | |
|---|---|---|---|
| १. वसन्तः | २. ग्रीष्मः | ३. वर्षा | ४. शरद् |
| ५. हेमन्तः | ६. शिशिरः | | |

**( ३ ) सप्ताहस्य सप्तदिवसाः -**

| | | | |
|---|---|---|---|
| १. रविवासरः | २. सोमवासरः | ३. मङ्गलवासरः | ४. बुधवासरः |
| ५. गुरुवासरः | ६. शुक्रवासरः | ७. शनिवासरः | |

**( ४ ) द्वौ पक्षौ -**

१. कृष्णपक्षः २. शुक्लपक्षः

**( ५ ) द्वे अयने -**

१. उत्तरायणम् २. दक्षिणायनम्

**( ६ ) सप्तविंशति नक्षत्रानि -**

| | | | |
|---|---|---|---|
| १. अश्विनी | २. भरणी | ३. कृतिका | ४. रोहिणी |
| ५. मृगशिरा | ६. आर्द्रा | ७. पुनर्वसुः | ८. पुष्यः |
| ९. आश्लेषा | १०. मघा | ११.पूर्वाफाल्गुनी | १२. उत्तराफाल्गुनी |
| १३. हस्तः | १४. चित्रा | १५.स्वाति | १६. विशाखा |
| १७. अनुराधा | १८. ज्येष्ठा | १९.मूलम् | २०. पूर्वाषाढा |
| २१. उत्तराषाढा | २२. श्रवणः | २३.धनिष्ठा | २४. शतभिषा |
| २५. पूर्वाभाद्रपदः | २६. उत्तराभाद्रपदः | २७.रेवती | |



www.rajteachers.com

## क्रमवाचक शब्द २१ से ५० तक ( मूलरूपम् )

| क्र.सं. | पूरणी संख्या पुँल्लिङ्गम् | पूरणी संख्या स्त्रीलिङ्गम् | पूरणी संख्या नपुसंकलिङ्गम् |
|---|---|---|---|
| २१ | एकविंशः | एकविंशी | एकविंशम् |
| २२ | द्वाविंशः | द्वाविंशी | द्वाविंशम् |
| २३ | त्रयोविंशः | त्रयोविंशी | त्रयोविंशम् |
| २४ | चतुर्विंशः | चतुर्विंशी | चतुर्विंशम् |
| २५ | पञ्चविंशः | पञ्चविंशी | पञ्चविंशम् |
| २६ | षड्विंशः | षड्विंशी | षड्विंशम् |
| २७ | सप्तविंशः | सप्तविंशी | सप्तविंशम् |
| २८ | अष्टाविंशः | अष्टाविंशी | अष्टाविंशम् |
| २९ | नवविंशः | नवविंशी | नवविंशम् |
| २९ | एकोनत्रिंशः | एकोनत्रिंशी | एकोनत्रिंशम् |
| ३० | त्रिंशः | त्रिंशी | त्रिंशम् |
| ३१ | एकत्रिंशः | एकत्रिंशी | एकत्रिंशम् |
| ३२ | द्वात्रिंशः | द्वात्रिंशी | द्वात्रिंशम् |
| ३३ | त्रयस्त्रिंशः | त्रयस्त्रिंशी | त्रयस्त्रिंशम् |
| ३४ | चतुस्त्रिंशः | चतुस्त्रिंशी | चतुस्त्रिंशम् |
| ३५ | पञ्चत्रिंशः | पञ्चत्रिंशी | पञ्चत्रिशम् |
| ३६ | षड्त्रिंशः | षड्त्रिंशी | षड्त्रिंशम् |
| ३७ | सप्तत्रिंशः | सप्तत्रिंशी | सप्तत्रिंशम् |
| ३८ | अष्टात्रिंशः | अष्टात्रिंशी | अष्टात्रिंशम् |
| ३९ | नवत्रिंशः | नवत्रिंशी | नवत्रिंशम् |
| ३९ | एकोनचत्वारिंशः | एकोनचत्वारिंशी | एकोनचत्वारिंशम् |
| ४० | चत्वारिंशः | चत्वारिंशी | चत्वारिंशम् |


www.rajteachers.com

| | | | |
|---|---|---|---|
| ४१ | एकचत्वारिंशः | एकचत्वारिंशी | एकचत्वारिंशम् |
| ४२ | द्विचत्वारिंशः | द्विचत्वारिंशी | द्विचत्वारिंशम् |
| ४३ | त्रयश्चत्वारिंशः | त्रयश्चत्वारिंशी | त्रिचत्वारिंशम् |
| ४४ | चतुश्चत्वारिंशः | चतुश्चत्वारिंशी | चतुश्चत्वारिंशम् |
| ४५ | पञ्चचत्वारिंशः | पञ्चचत्वारिंशी | पञ्चचत्वारिंशम् |
| ४६ | षट्चत्वारिंशः | षट्चत्वारिंशी | षट्चत्वारिंशम् |
| ४७ | सप्तचत्वारिंशः | सप्तचत्वारिंशी | सप्तचत्वारिंशम् |
| ४८ | अष्टचत्वारिंशः | अष्टचत्वारिंशी | अष्टचत्वारिंशम् |
| ५९ | नवचत्वारिशः | नवचत्वारिंशी | नवचत्वारिंशम् |
| ५९ | एकोनपञ्चाशः | एकोनपञ्चाशी | एकोनपञ्चाशम् |
| ५० | पञ्चाशतः | पञ्चाशी | पञ्चाशम् |


www.rajteachers.com

पञ्चदशः पाठः
१५

# स्वच्छं भारतम्

**पात्रपरिचयः**

| | | |
|---|---|---|
| लोकेशः | – | गृहस्वामी |
| सन्ध्या | – | लोकेशस्य पत्नी |
| शुचिः | – | लोकेशस्य पुत्री |
| श्रीशः | – | लोकेशस्य पुत्रः |
| कौस्तुभः | – | श्रीशस्य मित्रम् |
| यशवर्धनः | – | लोकेशस्य पिता |
| वन्दना | – | यशवर्धनस्य पत्नी, लोकेशस्य माता |
| रचना | – | शुच्याः सखी |

(स्वमित्राभ्यां रचनाकौस्तुभाभ्यां सह शुचिश्रीशौ विद्यालयात् गृहम् आगच्छतः। आलिन्दे यशवर्धनः आसन्दे उपविष्टः)

**शुचिश्रीशौ** – प्रणमावः पितामह! (सर्वे प्रणमन्ति)

**यशवर्धनः** – आयुष्मान् भव। (रचनाकौस्तुभौ प्रति) एतौ कौ ?

**श्रीशः** – एषः मम मित्रं कौस्तुभः।

**शुचिः** – एषा च मम सखी रचना।

**वन्दना** – (प्रविश्य) भोः! विद्यालयात् विलम्बः किमर्थम् ?




**श्रीशः** – अद्य विद्यालये स्वच्छताकार्यक्रमः आसीत्।

**यशवर्धनः** – प्रतिदिवसं विद्यालये स्वच्छता न भवति किम् ?

**कौस्तुभः** – भवति किन्तु अद्य अभियानरूपेण



www.rajteachers.com

विद्यालयात् बहिः अपि सार्वजनिकेषु स्थानेषु छात्राणां समूहं निर्माय स्वच्छतां कृतवन्तः।

**वन्दना** – अस्मिन् विषये सर्वान् छात्रान् कः प्रेरितवान् ?

**रचना** – अस्माकं प्रधानाचार्यः उद्बोधितवान् ?

**लोकेशः** – (प्रविश्य) अरे किं प्रचलति अत्र ?

**यशवर्धनः** – (विहस्य) विद्यालयस्य स्वच्छताविषयकं संस्मरणं श्रावयन्ति।

**लोकेशः** – (आसन्दे उपविश्य) अहमपि श्रोतुम् इच्छामि, श्रावयन्तु।

**कौस्तुभः** – पितृव्य! प्रधानाचार्यः बोधितवान् यत् अस्माकं देशे "स्वच्छताभियानम्" प्रचलति।




**शुचिः** – अपि च सः उक्तवान् यद् अस्माकं गृहस्य स्वच्छता तु करणीया एव सार्वजनिकस्थानेषु बसस्थाने, उद्याने, चिकित्सालये अपि स्वच्छतायाः अस्माकं दायित्वम्।

**लोकेशः** – केवलं दायित्वं वा आचरणीयम् ?

**श्रीशः** – भोः पितः! अद्य तु वयं समूहे तत्र गत्वा स्वच्छतां कृतवन्तः।

**यशवर्धनः** – (हसन्) लोकेश! बालकाः प्रबुद्धाः अभवन्।

**वन्दना** – अरे एतत् तु अस्माकं प्रधानमन्त्रिमहोदयस्य चमत्कारोऽस्ति।

**लोकेशः** – आम्! तेन प्रेरिताः सर्वे नेतारः अधिकारिणः नागरिकाश्च एतस्मिन् कार्ये प्रवृत्ताः सन्ति। मम कार्यालयेऽपि सर्वे ..............।

**शुचिः** – (मध्ये एव) दूरदर्शने अपि शौचालयनिर्माणविषये विज्ञापनम् आगच्छति।

**कौस्तुभः** – ये निर्धनाः सन्ति ते स्वगृहे शौचालयनिर्माणं कथं करिष्यन्ति।

**लोकेशः** – तेषां कृते सर्वकारः आर्थिकसहयोगं करोति।

**रचना** – अस्मिन् वर्षे अस्माकं विद्यालयेऽपि शौचालयानां निर्माणम् अभवत्।



www.rajteachers.com

**सन्ध्या** – (अल्पाहारम् आदाय प्रविश्य) विद्यालये परिश्रमं कृत्वा आगतवन्तः अतः अल्पाहारेण सह वार्तालापं कुर्वन्तु।

**शुचिः** – (अल्पाहारं कुर्वन्) आपणे पूर्वं सर्वे चायं पीत्वा अवकरम् इतस्ततः क्षिपन्ति स्म, किन्तु इदानीं सर्वकारेण अवकरपात्राणि स्थापितानि तत्र अवकरपात्रेषु अवकरं स्थापनीयम्।



**श्रीशः** – इदानीं तु चायचषकान् मह्यं ददतु। अहमेव मार्जयामि।

**सन्ध्या** – (आश्चर्येण) अहो! शोभनम् शोभनम्।

**वन्दना** – सन्ध्ये! अद्य प्रभृतिः एते बालकाः गृहकार्येषु अपि साहाय्यं करिष्यन्ति इति चिन्तयामि।

**शुचिः** – आम् पितामहि! अस्माकं प्रधानाचार्या अपि स्वगृहे स्वच्छतादीनि कार्याणि करोति।

**यशवर्धनः** – भवत्याः प्रधानाचार्या एव न अस्माकं राष्ट्रपितामहात्मागान्धीः अपि साबरमती आश्रमे स्वयमेव स्वच्छताकार्यं करोति स्म। कर्मकरेषु आश्रितः नासीत्।

**लोकेशः** – सः तु अस्माकं प्रेरणापुरुषः अस्ति।

**रचना** – वयम् अपि विद्यालये प्रतिज्ञां कृतवन्तः यत् अस्माकं परिवेशं स्वच्छं करिष्यामः।

**सन्ध्या** – वयं गृहजनाः अपि प्रतिज्ञां करवाम यत् वयम् अस्माकं गृहं, कार्यालयं, चिकित्सालयं, धार्मिकस्थलानि, उद्यानानि, सार्वजनिकस्थलानि च स्वच्छं करवाम। तत्र अवकरम् इतस्ततः न क्षिपाम। येन अस्माकं देशः सुन्दरः नागरिकाः च स्वस्थाः भवन्तु।

**सर्वे** – आम्। सर्वे प्रतिज्ञां करवाम।

**(सर्वे प्रतिज्ञां कुर्वन्ति)**



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| आलिन्दे | कक्षात् बहिः आच्छादितः भागः | बरामदा |
| उद्‌बोधितवान् | विज्ञापितवान् | बताया |
| दायित्वम् | कर्तव्यम् | कर्तव्य |
| पितृव्यः | पितुः भ्राता | काका, ताऊ |
| प्रबुद्धाः | जागरुकाः | सचेत |
| प्रेरिताः | बोधिताः | प्रेरित किये गये |
| प्रवृत्ताः | संलग्नाः | लग गये |
| अवकरम् | अपशिष्टम् | कचरा |
| आपणम् | वस्तूनां क्रयविक्रय स्थानम् | बाजार/दुकान |
| चषकम् | चायपात्रम् | प्याला |
| कर्मकरेषु | कर्मचारिषु | कर्मचारियों पर |
| परिवेशम् | वातावरणम् | वातावरण |
| जवनिका | प्रावारकवस्त्रम् | पर्दा |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत -**

स्वच्छता संस्मरणम् श्रावयन्तु प्रबुद्धाः सर्वकारः

अवकरपात्राणि प्रभृतिः इतस्ततः उद्‌बोधितवान्।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत -**

(क) विद्यालये कः कार्यक्रमः आसीत् ?

(ख) अस्माकं प्रधानाचार्यः किम् उद्‌बोधितवान् ?

(ग) समूहे कुत्र गत्वा छात्राः स्वच्छतां कृतवन्तः ?

(घ) केन प्रेरिताः सर्वे नेतारः स्वच्छताकार्ये प्रवृत्ताः सन्ति ?

(ङ) अस्माकं देशे किम् अभियानं प्रचलति ?



www.rajteachers.com

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एक पदेन लिखत -**

(क) के प्रबुद्धाः अभवन् ?

(ख) निर्धनानां शौचालयनिर्माणार्थं कः आर्थिकं सहयोगं करोति ?

(ग) छात्राः कुत्र परिश्रमं कृत्वा आगतवन्तः ?

(घ) चायं पीत्वा जनाः अवकरं कुत्र क्षिपन्ति ?

(ङ) बालकाः गृहकार्येषु किं करिष्यन्ति ?

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्ये लिखत -**

(क) चायं पीत्वा अवकरं कुत्र स्थापनीयम्?

(ख) महात्मागान्धीः कुत्र स्वच्छताकार्यं करोति स्म?

(ग) अस्माकं परिवेशः कथं स्वच्छं भविष्यति?

(घ) देशस्य नागरिकाः स्वस्थाः कथं भवेयुः?

(ङ) सार्वजनिकेषु स्थानेषु स्वच्छतां करणाय के समूहं कृतवन्तः?

**३. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

| प्रधानाचार्यः, सर्वकारः, मम, कर्मकरेषु, प्रबुद्धा, स्वच्छता |
|---|

(क) एषः ............................................ मित्रं कौस्तुभः।

(ख) अद्य विद्यालये ............................ कार्यक्रमः आसीत्।

(ग) अस्माकं ............................................ उद्बोधितवान्।

(घ) तेषां कृते ............................ आर्थिकसहयोगं करोति।

(ङ) ............................................ आश्रितः न आसीत्।

**४. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत -**

(क) <u>मम</u> मित्रं कौस्तुभम्

(ख) <u>विद्यालयस्य</u> स्वच्छताविषयकं संस्मरणं श्रावयन्ति ।

(ग) <u>तेन</u> प्रेरिताः सर्वे नेतारः ।

(घ) <u>सर्वकारः</u> आर्थिकसहयोगं करोति ।

(ङ) <u>चायचषकान्</u> मह्यं ददतु ।



www.rajteachers.com

५. **अधोलिखितानां पदानां प्रकृतिप्रत्ययं पृथक् कुरुत -**

| | पदम् | प्रकृतिः | | प्रत्ययः |
|---|---|---|---|---|
| (क) | श्रोतुम् | ........................ | + | ........................। |
| (ख) | उपविश्य | ........................ | + | ........................। |
| (ग) | उक्तवान् | ........................ | + | ........................। |
| (घ) | गत्वा | ........................ | + | ........................। |
| (ङ) | आदाय | ........................ | + | ........................। |
| (च) | कृत्वा | ........................ | + | ........................। |
| (छ) | बोधितवान् | ........................ | + | ........................। |

६. **अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| | पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | मम | ................ | ................ | ................ |
| (ख) | विद्यालयात् | ................ | ................ | ................ |
| (ग) | स्थानेषु | ................ | ................ | ................ |
| (घ) | छात्रान् | ................ | ................ | ................ |
| (ङ) | शुच्याः | ................ | ................ | ................ |
| (च) | अस्माकम् | ................ | ................ | ................ |
| (छ) | मह्यम् | ................ | ................ | ................ |
| (ज) | सर्वकारेण | ................ | ................ | ................ |

## योग्यता-विस्तारः

(क) 'स्वच्छं भारतम्' इति विषयम् आधृत्य भित्तिचित्रनिर्माणं कुरुत ।

(ख) वयमपि सार्वजनिकेषु स्थानेषु स्वच्छताविषयकं सहयोगं कथं कर्तुं शक्नुमः ? लघुलेखं लिखतु ।

(ग) 'नमामि गङ्गे' अभियानस्य प्रेरणया वयं किं कर्तुं शक्नुमः ? सप्तकार्याणां सूचिनिर्माणं करोतु ।

(घ) सप्त सार्वजनिकस्थलानां नामानि लिखत यत्र स्वच्छता आवश्यकी वर्तते ।

(ङ) तेषां सप्तवस्तूनां नामानि लिखत यैः पर्यावरणम् प्रदूषितं भवति ।




www.rajteachers.com

षोडशः पाठः १६

# कर्तव्यपालनम्

चन्द्रगुप्तः मगधदेशस्य नृपः आसीत्। तस्य मन्त्री चाणक्यः तपोधनः राजतन्त्रज्ञः च आसीत्। मन्त्री अपि स एकस्मिन् उटजे निवसति स्म। वैराग्यभावनया सः पूर्णः आसीत्। एकदा नृपेण चाणक्याय कम्बलाः समर्पिताः। तान् कम्बलान् दरिद्रेभ्यः दातुं नृपः सूचितवान्।



चाणक्यस्य उटजं नगराद् बहिः आसीत्। केचन चौराः कम्बलान् अपहर्तुं चिन्तितवन्तः। ते एकदा रात्रौ चाणक्यस्य उटजं प्राविशन्। मध्यरात्रिसमये शीतकाले अतीव शैत्यम् आसीत्। तथापि चाणक्यः जीर्णकम्बलेन सह सुप्तः आसीत् । पार्श्वे नूतनकम्बलानां राशिः एव आसीत्। चौराणाम् आश्चर्यं जातं यत् पार्श्वे नूतनकम्बलानां राशिरेवास्ति तथापि चाणक्यः जीर्णकम्बलं धृत्वा शेते। चौराः चौर्यं न अकुर्वन् ते चाणक्यं प्रबोधितवन्तः। चौराः– ''महोदय! तव पार्श्वे नूतनकम्बलानां राशिः अस्ति तथापि जीर्णकम्बलं धृत्वा किमर्थं शयनं करोति?'' इत्यपृच्छन्। चाणक्यः उक्तवान् ''कम्बलाः नृपेण दत्ताः। ते दरिद्रेभ्यः दातव्याः। अतः श्वः प्रभाते वितरणं करिष्यामि। तेषां उपयोगं कर्तुं मम न अधिकारः। अहं विरक्तः सदा तृप्तः इति।''





www.rajteachers.com

इदं श्रुत्वा चौराः लज्जीभूताः। अन्येषां द्रव्यस्य उपयोगेन अधर्मः भवति इति चाणकस्य विचारः अस्ति। वयं जीवने प्रतिदिनम् अन्यस्य द्रव्यमेव अपहरामः। अधर्मं कुर्मः। पापस्य सङ्ग्रहः भवति इति चिन्तयित्वा ते चाणक्यमहामात्यात् क्षमां प्रार्थितवन्तः। ततः ते चौरकार्यं त्यक्तवन्तः।

**मातृवत्परदारेषु, परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु, यः पश्यति स पण्डितः।।**

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| नृपः | भूपतिः | राजा |
| तपोधनः | तपस्वी | तपस्वी |
| उटजे | कुट्याम् | कुटिया में |
| वैराग्यम् | निसङ्गता | विरक्ति |
| अपहर्तुम् | चोरयितुम् | चोरी करने के लिए |
| शैत्यं | शीतलता | सर्दी |
| कटे | कटस्य उपरि | चटाई पर |
| सुप्तः | शयानः | सोया हुआ |
| प्रबोधितवन्तः | जागरणं कृतवन्तः | जगाकर |
| द्रव्यम् | धनं | धन |
| अपहरामः | चोरयामः | चुराते हैं |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां पदानाम् उच्चारणं कुरुत –**

| | | | | |
|---|---|---|---|---|
| राजतन्त्रज्ञः | दरिद्रेभ्यः | उटजं | अपहर्तुं | प्रबोधितवन्तः |
| राशिरेवास्ति | दातव्याः | इत्यपृच्छन् | महामात्याः | चाणक्याय |
| कम्बलाः | मातृवत् | लोष्ठवत् | त्यक्तवन्तः | |



www.rajteachers.com

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) मगधदेशस्य नृपः कः आसीत् ?

(ख) एकस्मिन् उटजे कः निवसति स्म ?

(ग) चाणकस्य उटजं के प्राविशन् ?

(घ) चौराः केन कारणेन आश्चर्यचकिताः अभवन् ?

(ङ) परद्रव्यं कीदृशं भवति ?

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) चन्द्रगुप्तस्य मन्त्री कः आसीत् ?

(ख) एकदा नृपेण चाणक्याय किं समर्पितम् ?

(ग) के कम्बलान् अपहर्तुं चिन्तितवन्तः ?

(घ) "तेषां उपयोगं कर्तुं मम न अधिकारः" इति कः कथयति ?

**३. अधोलिखितानां प्रश्नानां उत्तराणि एकवाक्येन लिखत -**

(क) मन्त्री कुत्र निवसति स्म ?

(ख) नृपः कम्बलान् केभ्यः दातुं सूचितवान् ?

(ग) कम्बलान् अपहर्तुं के चिन्तितवन्तः ?

(घ) चौराः चाणक्यं किम् अपृच्छन् ?

**४. निम्नलिखितवाक्यानि निर्देशानुसारं काल ( लकारं ) परिवर्तनं कृत्वा पुनः लिखत -**

**उदाहरणम्-** चन्द्रगुप्तः मगधदेशस्य नृपः अस्ति। (लङ् लकार)

चन्द्रगुप्तः मगधदेशस्य नृपः आसीत्।

(क) मन्त्री एकस्मिन् उटजे निवसति। (लङ् लकार)

..........................................................................

(ख) प्रभाते वितरणं करोमि। (लृट् लकार)

..........................................................................

(ग) अन्येषां द्रव्यस्य उपयोगेन अधर्मः भविष्यति। (लट् लकार)

..........................................................................

(घ) अन्यस्य द्रव्यं न अपहरिष्यामः। (लट् लकार)

..........................................................................

(ङ) चाणक्यः कम्बलं विना निद्रां करिष्यति। (लट् लकार)

..........................................................................



www.rajteachers.com

५. निम्नपदान् स्वीकृत्य वाक्यरचनां कुरुत -

उजटे .................................................... ।

निवसति .................................................... ।

भावनया .................................................... ।

समर्पिताः .................................................... ।

दातुम् .................................................... ।

अपहर्तुम् .................................................... ।


प्रबोधितः .................................................... ।

स्वः .................................................... ।

प्रतिदिनम् .................................................... ।

## योग्यता-विस्तारः

### चाणकस्य विषये अन्या कथा



एकदा यवनसेनानायकः चाणकस्य उटजे आगच्छत्। रात्रिकालः आसीत्। चाणक्यः किञ्चिद् राज्यकार्यं करोति स्म। सः उत्थाय प्रथमं दीपकं निर्वापितं तदनन्तरं सः अन्यं दीपकं प्रज्वाल्य सेनानायकेन सह वार्तालापम् अकरोत्। सेनानायकः तस्य कारणम् अपृच्छत्। चाणक्यः अवदत् - ''महोदय! पुरा अहं राज्यकार्यं सम्पादयामि स्म। अतः मया राज्यतैलस्य उपयोगं कृतम्। अधुना अहं भवता सह वार्तालापाय राज्यतैलस्य उपयोगं कर्तुं न शक्नोमि। अहो! इदृशः आसीत् महामन्त्री चाणक्यः।



www.rajteachers.com

सप्तदशः पाठः
१७

# धेनुमहिमा

## ( परस्मैपदी धातु रूपाणि उकारान्तशब्दश्च )



माता पुत्रान् स्वदुग्धेन पोषयति तथा धेनुः अपि स्वदुग्धेन मानवान् पोषयति अत एव भारतीयाः जनाः तां धेनुं मातरम् इति कथयन्ति। गावो विश्वस्य मातरः। श्रीकृष्णः धेनूः अचारयत्। अतः सः गोपालः इति नाम्ना प्रसिद्धः अभवत्।

भारतीयाः धेनवः अनेकवर्णीयाः भवन्ति। तासु कपिलायाः धेनोः महत्त्वम् अधिकं भवति। मातृदुग्धानन्तरं धेनुदुग्धम् एव सर्वाधिकं सुपाच्यं, पौष्टिकं, बलवर्धकं च भवति। अतएव धेनुभिः सह मातृतुलना कृता। दुग्धात् दधिः, नवनीतं, घृतं, तक्रं, मिष्ठान्नं च जायन्ते।

तक्रेण घृतेन च प्राणरक्षकाः अनेकाः औषधयः निर्मिताः भवन्ति। भारतीयचिकित्साग्रन्थेषु धेनोः मूत्रं, पुरीषं, दुग्धं, दधि, घृतं पञ्चगव्यरुपेण वर्णितम्। गोमूत्रं अनेकासु औषधिषु अपि प्रयुक्तं भवति। गोमयेन वयं स्वगृहान् पवित्रीकुर्मः। गोमयस्य उपयोगः जैविको ऊर्वरकरूपे अधुनाऽपि क्रियते तेन शस्यानां वृद्धिः जायते।

पञ्चगव्यस्य उपयोगः मानसिकव्याधिषु, कीटनाशकरूपे गृहव्यवस्थायां, पाण्डुरोगस्य, विचर्चिकारोगस्य, प्रमेह रोगस्य, क्षयरोगस्य च निवारणार्थं भवति। अनेन सिद्धयति यत् गौः अनेकेन प्रकारेण अस्माकं मातृवत् रक्षां करोति।

विष्णोः परमधाम्नि भूरिश्रृङ्गा धेनवः न्यवसन्। भगवतः ऋषभदेवस्य चिह्नम् अपि धेनोः अपत्यं वृषभः एव। भगवतः शिवस्य वाहनोऽपि नन्दी वृषभः एव। भूपतेः दिलीपस्य अनपत्यतायाः निराकरणमपि महर्षेः वशिष्ठस्य धेनुना नन्दिन्या एव कृतम्। कामधेनुः एतादृशी गौ-रूपेण वर्णिता यस्याराधनमात्रेण मानवस्य सकलानां मनोरथानां पूर्तिर्जायते। धेनूनां गाथामाकर्ण्य वयमपि चिन्तयाम तासां कृते किमपि कुर्याम। तस्याः कृते समाजस्य उपेक्षावृत्तिः निराकरणीयाः। तद्वंशजासु धेनुषु स्व श्रद्धां प्रदर्शयाम।

उक्तञ्च –

**तृणं खादति केदारे, जलं पिबति पल्वले ।**
**दुग्धं यच्छति लोकेभ्यः, धेनुर्नो जननी प्रिया ।।**



www.rajteachers.com

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सुपाच्यं | सम्यक् पचनम् | अच्छी तरह से पचने योग्य |
| तादृक् | तथा प्रकारेण | उस प्रकार |
| पुरीषम् | गोमयम् | गोबर |
| पाण्डुरोगः | पीत ज्वरः | पीलिया |
| विचर्चिका | चेचकं रोगस्य इति नाम | चेचक |
| वृषभः | बलीवर्दः | बैल |
| अपत्यम् | पुत्रः | सन्तान |
| मनोरथानाम् | अभीष्टानाम् | मन की इच्छाओं का |
| भूरिशृङ्गा | बहवः शृङ्गा | अधिक सींग वाली |
| जैविक | जीवयुक्त | जीवों से उत्पन्न प्राकृतिक खाद |
| तक्रं | कट्वरम् | छाछ |
| नवनीतं | हैयङ्गवीनम् | मक्खन |
| ऊर्वरकं | पादपानां खाद्यं रसायनं च | खाद |





www.rajteachers.com

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां पदानाम् उच्चारणं कुरुत -**

स्वदुग्धेन पञ्चगव्यस्य पौष्टिकम् मिष्ठान्नम्

उच्चारयति अनपत्यतायाः विचर्चिकारोगस्य

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत् -**

(क) धेनुः माता कथम् अस्ति ?

(ख) वशिष्ठस्य धेनोः नाम किम् ?

(ग) गोरक्षार्थं कानि कार्याणि प्रचलन्ति ?

(घ) गोमूत्रस्य प्रयोगः कुत्र भवति ?

(ङ) पाठात् का शिक्षा मिलति ?

### लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) शस्यानां वृद्धि केन जायते ?

(ख) शिवस्य वाहनः कः अस्ति ?

(ग) गावो कस्य मातरः ?

(घ) कः धेनूः अचारयत् ?

(ङ) भवगतः ऋषभदेवस्य चिह्नं किम् ?

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत -**

(क) कस्याः धेनोः महत्त्वं अधिकम् अस्ति ?

(ख) पञ्चगव्यस्य नामानि लिखत ।

(ग) दुग्धात् कानि जायन्ते ?

(घ) गोमयस्य उपयोगः कुत्र भवति ?

(ङ) दिलीपः पुत्रं कथं प्रासवान् ?



www.rajteachers.com

## ३. अधोलिखितशब्दानां साहाय्येन रिक्तस्थानानि पूरयत -

श्रीकृष्णः, मातरः, कपिलायाः, दुग्धम्, गावः, सुपाच्यम्

(क) गावो विश्वस्य ........................................।

(ख) ........................................ धेनूः अचारयत् ।

(ग) परोपकाराय दुहन्ति........................................।

(घ) धेनूनां.............................. शिशुभ्यः पौष्टिकं भवति ।

(ङ) तासु.......................... धेनोः महत्त्वम् अधिकं भवति ।

## ४. उदाहरणमनुसृत्य अधोलिखितपदेषु प्रथमा-द्वितीया-षष्ठीविभक्तेः शब्दान् चित्वा लिखत -

(पूजाम्, अस्माकम्, वृक्षाः, मानवान्, आर्यसमाजस्य, नद्यः, गावः, धेनूनाम् विष्णोः, वशिष्ठस्य, दुग्ध्, ताम्, गोशालानाम्, जनाः, कृषकाः ।)

| | प्रथमा | द्वितीया | षष्ठी |
|---|---|---|---|
| यथा- | धेनुः | श्लोकान् | मानवस्य |
| | ............... | ................ | ................ |
| | ............... | ................ | ................ |
| | ............... | ................ | ................ |
| | ............... | ................ | ................ |

## ५. भिन्नप्रकृतिकपदं चिनुत -

(क) दुग्धम्, फलरसम्, दधिः, घृतम्।

(ख) धेनूः, गौः, सुरभिः, अजा ।

(ग) तादृक्, खादति, पिबति, यच्छति ।

(घ) मधुरम्, सुपाच्यम्, विश्वस्य, बलवर्धकम् ।



www.rajteachers.com

## योग्यता-विस्तारः

### ( क ) पाठविस्तारः –

भारतीये जनजीवने धेनुषु स्नेहः आदरश्च आस्ताम्। भारतीयेषु प्राचीनराज्येषु गौशालाविभागस्य व्ययस्य पृथक् प्रावधानम् आसीत्। अधुनाऽपि राज्यसर्वकारैः केन्द्र-सर्वकारेण समये-समये गौशालाकृते अनुदानं दीयते। अनेकेषु राज्येषु गौवंशवधोपरि प्रतिबन्धाः सन्ति। भारतीये संविधानेऽपि राज्यस्य नीतिनिर्देशकतत्त्वेषु गोरक्षायाः प्रावधानं वर्तते। मध्यकालीन समयात् गोहत्या प्रतिबन्धकृते अनेकानि आन्दोलनानि प्रचलन्ति। आर्यसमाजस्य संस्थापकः महर्षिदयानन्दसरस्वतिना गो करुणानिधिः ग्रन्थः लिखितः तस्मिन् धेनूनाम् उपयोगिता विषये विस्तारेण वर्णितम्। गोरक्षार्थं हस्ताक्षरम् अभियानं गोशालानां स्थापना, विश्वमङ्गलगोग्रामयात्रा आदि बहवः अभियानाः प्रचलन्ति।

राजस्थाने वर्तमानसमये अनेकाः सञ्चालिताः गौशालाः यथा –

१. श्री गोधाम महातीर्थ आनन्दवन पथमेडा सांचौर (जालौर)।

२. श्री मनोरमा गोलोक तीर्थ नन्दगांव रेवदर (सिरोही)।

३. परमपूज्यमाधवगौ विज्ञान अनुसन्धान केन्द्र नौगावां (भीलवाडा)।

संस्कृतसाहित्ये धेनु गो, सुरभिः, कामधेनुः, अर्च्या (पूज्या), विश्वस्यायु, रुद्रानां माता, वसुनां पुत्री, अदितिपुत्रानां भगिनी, सर्वदेव पूज्याः च वदन्ति। वयमपि धेनूनाम् उपकाराणि स्मृत्वा ताभ्यः प्रणामाञ्जलयः वितरामः।

### ( ख ) भाषा-विस्तारः

**दा ( देना ) उभयपदी ( परस्मैपदस्य रूपाणि )**

**लट्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | ददाति | दत्तः | ददति |
| मध्यमः पुरुषः | ददासि | दत्थः | दत्थ |
| उत्तमः पुरुषः | ददामि | दद्वः | दद्मः |

**लोट् लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | ददातु | दत्ताम् | ददतु |
| मध्यमः पुरुषः | देहि | दत्तम् | दत |
| उत्तमः पुरुषः | ददानि | ददाव | ददाम |



www.rajteachers.com

## लङ्लकारः

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | अददात् | अदत्ताम् | अददुः |
| मध्यमः पुरुषः | अददाः | अदत्तम् | अदत्त |
| उत्तमः पुरुषः | अददाम् | अदद्व | अदद्म |

## विधिलिङ्लकारः

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | दद्यात् | दद्याताम् | दद्युः |
| मध्यमः पुरुषः | दद्याः | दद्यातम् | दद्यात |
| उत्तमः पुरुषः | दद्याम् | दद्याव | दद्याम |

## लृट्लकारः

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | दास्यति | दास्यतः | दास्यन्ति |
| मध्यमः पुरुषः | दास्यसि | दास्यथः | दस्यथ |
| उत्तमः पुरुषः | दास्यामि | दास्यावः | दास्यामः |

## धेनु ( उकारान्त स्त्रीलिङ्गशब्दः )

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी | धेन्वै, धेनवेः | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी | धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |
| सम्बोधन | हे धेनो! | हे धेनू! | हे धेनवः |


www.rajteachers.com

( ख ) धेनोः चित्रं दृष्ट्वा दशवाक्यानि लिखत -



१. ................................................................ ।

२. ................................................................ ।

३. ................................................................ ।

४. ................................................................ ।

५. ................................................................ ।

६. ................................................................ ।

७. ................................................................ ।

८. ................................................................ ।

९. ................................................................ ।

१०. ................................................................ ।



www.rajteachers.com

# परिशिष्टम्

(१) अपठित-गद्यांश:

(२) निबन्ध:

(३) कथालेखनम्

(४) वाक्यनिर्माणम्

(५) वाक्यक्रम-संयोजनम्

(६) पत्रलेखनम्

(७) वर्णोच्चारणस्थानानि

(८) इमानि अपि अवलोकयत

## १. अपठित-गद्यांश:

(क) हिमालयो नाम पर्वत: भारतदेशस्य उत्तरस्यां दिशि वर्तते। अस्य शिखरभागा: सदैव हिमाच्छादिता: सन्ति। अतएव स: हिमस्य आलय: अर्थात् 'हिमालय:' कथ्यते। स: विश्वस्य समस्तेषु पर्वतेषु उन्नततम:। अत एव स: 'नगाधिराज:' इत्यपि ज्ञायते। पर्वतोऽयं भगवत: शिवस्य 'क्रीडास्थली, भगवत्या: पार्वत्या: उत्पत्तिस्थलमपि, विविधकिन्नर-गन्धर्व-साधु-सुरादीनां वसतिरपि।

**प्रश्ना:** –

१. उपर्युक्तगद्यांशस्य उचितं शीर्षकं लिखत ?

२. हिमालय: भारतस्य कस्यां दिशि वर्तते ?

३. हिमालय: कस्य क्रीडास्थली अस्ति ?

४. क: विश्वस्य समस्तेषु पर्वतेषु उन्नततम:?

५. 'नगाधिराज:' कस्य अपर नाम ?

६. हिमालय: पदस्य समासविग्रह: क: अस्ति ?

(ख) संस्कृतभाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे भारतीया: संस्कृतभाषायां एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधा: प्रान्तीया: भाषा: प्रचलिता: अभवन् किन्तु संस्कृतस्य महत्वम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्था: चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकताया: आधार: अस्ति।



www.rajteachers.com

**प्रश्नाः –**

१. उपर्युक्तगद्यांशस्य उचितं शीर्षकं लिखत ?

२. अस्माकं देशस्य प्राचीनतमा भाषा का ?

३. सर्वे वेदग्रन्थाः कस्यां भाषायां सन्ति ?

४. भारतराष्ट्रस्य एकतायाः आधारः कः ?

५. संस्कृतभाषायाः व्यवहारं कदा कुर्वन्ति स्म ?

६. 'अद्यापि' शब्दस्य सन्धिविच्छेदः कः भवति ?

(ग) विद्या सर्वेषां श्रेष्ठं धनमस्ति। तेन एव मनुष्यो भवति अन्यथा विद्यारहितो पशुः अस्ति। इदं धनं चौराश्चोरयितुं बान्धवाश्च विभाजयितुं न शक्नुवन्ति। व्यये कृते इदं धनं सर्वदा वर्धते। विदेशगमने विद्या परमसहायिका भवति।

**प्रश्नाः –**

१. उपर्युक्तगद्यांशस्य उचितं शीर्षकं लिखत ?

२. किं धनम् श्रेष्ठम् अस्ति ?

३. व्यये कृते किं वर्धते ?

४. विद्या कुत्र परमसहायिका भवति ?

५. कां चौराश्चोरयितुं न शक्नुवन्ति ?

(घ) भारतीयधर्मस्य मूलाधारः अहिंसा एव अस्ति। गीतायां श्रीकृष्णेन देवी–सम्पत्सु अहिंसायाः गणना प्रथमे स्थाने कृता। बौद्धधर्मः, जैनधर्मः च उभौ अहिंसाप्रधानौ एव। महात्मागाँधी अपि अहिंसायाः पालने बलं दत्तवान्। तस्य अयं विश्वासः आसीत् यद् अहिंसकस्य सम्मुखे हिंसकः अपि स्वस्य हिंसावृत्तिं परित्यजति।

**प्रश्नाः –**

१. उपर्युक्तगद्यांशस्य उचित–शीर्षकं लिखत ?

२. कस्य मूलाधारः अहिंसा भवति ?

३. कौ अहिंसाप्रधानौ धर्मौ स्तः ?

४. अहिंसा मार्गः केन महापुरुषेण स्वीकृतः ?

५. कुत्र अहिंसायाः गणना प्रथमे स्थाने कृता ?



www.rajteachers.com

(ङ) कस्मिंश्चिन्नगरे एकं महत् मन्दिरमासीत्। तत्र एको महात्मा निवसति स्म। स सदा वेदशास्त्राभ्यासम् अकरोत्। लोकानां कल्याणाय शास्त्रकथाश्चाश्रावयत्। तत्र अनेके महिलापुरुषाः कथां श्रोतुं सङ्घीभूय प्रतिदिनं प्रयान्ति स्म। देवप्रतिमां च पूजयन्ति स्म।

**प्रश्नाः** –

१. उपर्यक्तगद्यांशस्य उचितं शीर्षकं लिखत?

२. मन्दिरं कुत्र आसीत् ?

३. मन्दिरे कः निवसति स्म ?

४. महात्मा सदा किं अकरोत् ?

५. महिलापुरुषाः प्रतिदिनं किमर्थं प्रयान्ति स्म ?

६. निवसति पदे उपसर्ग–धातु–लकार–पुरुष–वचनं किम् अस्ति ?

## २. निबन्धः

### १. भारतदेशः

भारतवर्षः अस्माकं देशः अस्ति। अयं अस्माकं जन्मभूमिः। अस्य भूमिः विविध–रत्नानां जननी अस्ति। अस्य प्राकृतिकी शोभा अनुपमा अस्ति। हिमालयः अस्य प्रहरी अस्ति। एषः उत्तरे मुकुटमणिः इव शोभते। सागरः अस्य चरणौ प्रक्षालयति। भारतवर्षः अखिलविश्वस्य गुरुरस्ति। अनेकाः पवित्रतमाः नद्यः अत्र वहन्ति। गङ्गा, गोदावरी, सरस्वती, यमुना प्रभृत्यः नद्यः अस्य शोभां वर्धयन्ति। अयं देशः सर्वासां विद्यानां केन्द्रम् अस्ति। अयम् अनेकप्रदेशेषु विभक्तः। अत्र विविधधर्मावलम्बिनः सम्प्रदाायिनः जनाः निवसन्ति। अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठा अस्ति। इयं भूः स्वर्गः अपि वर्तते। ईश्वरस्य अवताराः अस्मिन् देशे सञ्जाताः। वयं स्वदेशोपरि गर्वान्विताः स्मः।

### २. संस्कृतभाषायाः महत्वम्

संस्कृतभाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे भारतीयाः संस्कृतभाषायाः व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन् किन्तु संस्कृतस्य महत्त्वम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति। संस्कृतम् सर्वत्र देशे समानरूपेण आद्रियते। संस्कृतभाषायाः यत् स्वरूपं अद्य प्राप्यते तदेव अद्यतः सहस्त्रवर्षपूर्वमेव आसीत्। संस्कृतभाषायाः स्वरूपं पूर्णरूपेण वैज्ञानिकम् अस्ति। अस्य व्याकरणं पूर्णतः तर्कसम्मतं च। आचार्य दण्डिना सम्यगेवोक्तम् –

"भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती"



www.rajteachers.com

## ३. अनुशासनम्

समाजे नियमानां पालनम् अनुशासनं भवति। जीवने अनुशासनस्य विशेषं महत्त्वं भवति। प्रत्येकस्मिन् पदे अनुशासनम् आवश्यकं भवति। अनुशासनं विना किमपि कार्यं सफलं न भवति। छात्रेभ्यः अनुशासनं व्यवस्थायै परमावश्यकम् अस्ति। अनुशासितः सर्वेभ्यः प्रियः भवति। सामाजिकव्यवस्थायै अनुशासनम् अत्यन्तम् आवश्यकम् अस्ति। यस्मिन् समाजे अनुशासनं न भवति तत्र सदैव कलहः भवति। शिक्षकस्य अनुशासने छात्राः निरन्तरं उन्नतिपथे गच्छन्ति। प्रकृतिः अपि ईश्वरस्य अनुशासने तिष्ठति। यः नरः पूर्णतया अनुशासनं पालयति सः स्वजीवने सदा सफलः भवति। अतः अनुशासनस्य पालनं जीवने बहु आवश्यकं भवति।

## ४. अस्माकं विद्यालयः

अस्माकं विद्यालयः ग्रामस्य मध्ये अस्ति। एषः एकः आदर्शविद्यालयः अस्ति अहम् अत्र पठामि। विद्यालयं गत्वा सर्वे बालकाः शिक्षकान् प्रणमन्ति। ततः प्रार्थनां कृत्वा पाठं पठन्ति। मध्याह्नकाले अस्माकं भोजनावकाशः भवति। तदा सर्वे छात्राः मिलित्वा भोजनं कुर्वन्ति। ततः पुनः सर्वे अध्ययनं कुर्वन्ति। अस्माकं विद्यालये विद्याध्ययनस्य वातावरणं विद्यते। अस्य भवनं सुन्दरम् अस्ति। भवनं परितः एकं रमणीयम् उद्यानम् अस्ति।

अस्माकं विद्यालये विंशति अध्यापकाः पञ्चशतं छात्राः च सन्ति। सर्वे अध्यापकाः स्व स्व विषयेषु विद्वांसः सन्ति। ते छात्रान् मनसा ध्यानेन च पाठयन्ति। अस्माकं प्रधानाचार्यः अतीव योग्यः, अनुशासनप्रियः, विद्वान् च अस्ति। अस्माकं विद्यालयः क्रीडाक्षेत्रेऽपि अग्रगण्यः अस्ति। अत्र एकं रमणीयम् उद्यानम् एका महती प्रयोगशाला, एकः पुस्तकालयः, एकः वाचनालयः, एकः सङ्गणक–कक्षः एकः क्रीडाकक्षः च अस्ति एवम् अस्माकं विद्यालयः सर्वगुणोपेतं विद्यामन्दिरं नूनम्। अस्माकम् एतद् कर्तव्यं यत् वयम् अस्य कीर्तिं सर्वासु दिक्षु विस्तारयेम।

## ५. परोपकारः

परेषाम् उपकारः परोपकारः कथ्यते। यत्कार्यं निःस्वार्थभावनाया क्रियते तदैव परोपकारः। संसारे द्विविधा मनुष्याः सन्ति। तेषु केचन् सज्जनाः भवन्ति। तेषां सम्पूर्ण–जीवनं परहितार्थं समर्पितं भवति। वृक्षाः परहिताय स्वफलानि छायां च यच्छन्ति। नद्यः परेषां पिपासां शान्तयितुं अनवरतं प्रवहन्ति। मेघाः जलं वर्षित्वा संसारं हरितं कुर्वन्ति। प्रकृतिः निरन्तरं परकल्याणरता वर्तते। परम् इयं कदापि प्रत्युपकारं न वाञ्छति। प्रकृतेः सदृशः परोपकारिणः स्वशरीरम् अपि परोपकारायैव मन्यते। अस्माकं देशे दधीचिः, शिविः इत्यादयः अनेके महापुरुषाः स्वशरीरं दत्वा अपि परोपकारं अकुर्वन्। अतः वयमपि परोपकारिणः


www.rajteachers.com

भवेम। उक्तं च –

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

### ६. शिक्षकः

यः शिक्षयति सः शिक्षकः। शिक्षकः छात्राणाम् अज्ञानान्धकारं दूरीकरोति। अशिक्षितः मानवः पशुतुल्यः भवति। शिक्षकः मनुष्यस्य बाल्यकालादेव तस्य मनः मस्तिष्कं च शिक्षयति। शिक्षितं कृत्वा जनं मनुष्यं करोति। प्राचीनकाले गुरुकुले शिक्षकाः छात्रेभ्यः शिक्षयन्ति स्म। छात्राः तान् गुरुः इति अकथयन्। शिक्षकः बालकान् दुष्प्रवृत्तेः वारयति। सः संयमानुशासनं ज्ञानं च शिक्षयति। सः बालकेषु परोपकारस्य, सेवायाः, त्यागस्य भावनां पूरयति। एतादृशः शिक्षकस्य स्थानं समाजे अपि महत्वपूर्णम् अस्ति। अस्माकं देशे प्रतिवर्षे सितम्बरमासस्य पञ्चमे दिनाङ्के "शिक्षकदिवसः" आयोज्यते। अस्माकं राष्ट्रपतिमहोदयाः शिक्षकानां सम्मानं कुर्वन्ति। वयं सर्वदा शिक्षकस्य सम्मानं कुर्याम, तस्य आज्ञां शिरोधार्यं कुर्याम च। शिक्षकः राष्ट्रनिर्माता इत्यपि कथ्यते। शिक्षकः एव सन्नागरिकस्य देशभक्तस्य च निर्माणं करोति।

## ३. कथालेखनम्

### १. बुद्धिमान् शिष्यः

(पण्डितः, विद्याभ्यासार्थम्, परीक्षार्थम्, शिष्यः, अत्रैव, सर्वव्यापी, नास्ति, समाधानम्)

काशीनगरे एकः ........................ अस्ति 'पण्डितसमीपम् एकः ...................... आगच्छति। शिष्यः वदति–"आचार्य! अहं........................आगतवान्! पण्डितः शिष्यबुद्धि .................... पृच्छति–वत्स! देवः कुत्र अस्ति ?" शिष्यः वदति – गुरो! देवः कुत्र .............................। कृपया भवान् एवं वदतु। सन्तुष्टः गुरु वदति – देवः सर्वत्र अस्ति। देवः .............................! त्वम् बुद्धिमान् अतः विद्याभ्यासार्थम् ............................... वस।

### २. चतुरः काकः

(काकः, उपायं, उपरि, प्रस्तरखण्डान् जलार्थं, पिबामि, बहुदूरं, जलं, घटं, सन्तोषः, स्वल्पम् पिबति, तृषितः)

एकः .................. अस्ति। सः बहु ...................सः ................ भ्रमति। तदा ग्रीष्मकालः कुत्रापि .................... नास्ति काकः .....................गच्छति। तत्र सः एकं ...............पश्यति। काकस्य अतीव ...................... भवति। किन्तु घटे ..................... एव जलम् अस्ति। जलं कथं ..................? इति काकः चिन्तयति। सः एकम् ............... करोति। .............. आनयति। घटे पूरयति। जलम् ........... आगच्छति। काकः सन्तोषेण जलं ................ ततः गच्छति।



www.rajteachers.com

## ३. दैवमेव परम्

(प्रदर्शनं, सर्पान्, पेटिकायां, दिनानि, कदाचित्, बभुक्षितः, आहारः, गमनाय, अक्ष्याणि, रन्ध्रम्, मूषकः, निश्चयम्, प्रवेशम्, मुखे, बहिः, अखादत्, सौभाग्यम्, दौर्भाग्यम्।)

एकः अहितुण्डिकः आसीत्। सः ................ गृहीत्वा जीवनं यापनं करोति स्म। एकदा सः एकं सर्पम् आनयति। सर्पम् ....................... स्थापयति च। प्रतिदिनं सर्पस्य ..........................करोति जीवनं यापयति। .............................अहितुण्डिकः अन्यं ग्रामम् अगच्छत्। तस्य पत्नी पुत्राः अपि अगच्छतः। सर्पः पेटिकायामेव बद्धः आसीत्। पञ्च ................ अभवन्। अहितुण्डिकः न आगच्छत्। सर्पस्य .......................... एव नास्ति। सः पेटिकात् बहिः ........................ प्रयत्नम् अकरोत्। सः ............................. आसीत्। अतः शक्तिः नास्ति। विफलः अभवत्। तदा पेटिका समीपे एकः ............................... आगच्छत्। सः पेटिकाम् अपश्यत्। पेटिकायां ..................... सन्ति। इति मूषकः अचिन्तयत् .............................. करोमि। इति सः .............................. अकरोत्। अनन्तरं सः रन्ध्रं कृत्वा अन्तः .................... अकरोत्। मूषकः सर्पस्य .................एव अपतत्। सर्पः मूषकम् ............................। तेन रन्ध्रेण एवं ........................ आगच्छत। अहो सर्पस्य ..........................मूषकस्य ..........................।

## ४. वाक्यनिर्माणम्

(चित्रं दृष्ट्वा मञ्जूषातः पदं चित्वा वाक्यनिर्माणं कुरुत)

### १. विद्यालयः

(अस्माकं, छात्र-छात्राश्च, अध्यापकाः, द्वादश कक्षाः, पञ्चशतं छात्राः)



१. ................................................

२. ................................................

३. ................................................

४. ................................................

५. ................................................

### २. उद्यानम्

(विद्यालयस्य समीपे, वृक्षाः, खगाः, पुष्पाणि, भ्रमणाय)



१. ................................................

२. ................................................

३. ................................................



www.rajteachers.com

४.　　.................................................

५.　　.................................................

### ३. मेलापकः

(जनसम्मर्दः, मिष्ठान्नानि, क्रीडनकाः, दोलनानि, आपणाः)



१.　　...........................................

२.　　...........................................

३.　　...........................................

४.　　...........................................

५.　　...........................................

### ४. पुस्तकालयः

(विद्यालये, सार्वजनिकस्थाने, पुस्तकालयः, जनाः, दैनिकसमाचारपत्राणि, विविध विषयानाम् पुस्तकानि)



१.　　............................................

२.　　............................................

३.　　............................................

४.　　............................................

५.　　............................................

६.　　............................................

## ५. वाक्यक्रम-संयोजनम्

अधोलिखितवाक्यानां क्रमसंयोजनं कुरुत –

(१)　१.　रामेण सह सीता लक्ष्मणः चापि वनम् अगच्छताम्।

२.　रामः वनम् अगच्छत्।

३.　रामः दशरथस्य पुत्रः आसीत्।

४.　रावणः सीताम् अपहरत्।

५.　रामः रावणं ससैन्यम् हतवान्।

१.　.................................................................

२.　.................................................................

३.　.................................................................



www.rajteachers.com

४. ..................................................................
५. ....................................................................

(२) १. वासुदेवः कञ्चित् देवालयम् अपश्यत्।
२. ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् आगच्छत्।
३. वासुदेवः तस्य प्रियशिष्यः आसीत्।
४. अत्रान्तरे सः रामनाथपुरं प्रति प्रस्तिथवान्।
५. गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।
१. ...................................................................
२. ..................................................................
३. ..................................................................
४. ..................................................................
५. ....................................................................

(३) १. कुण्डलस्य पुत्रः सुकर्मा महान् पितृभक्तः।
२. सः वेदशास्त्रज्ञः आसीत्।
३. कुण्डलः कश्चन सदाचारी वृद्धः ब्राह्मणः आसीत्।
४. तस्य एकः पुत्रः सुकर्मा आसीत्।
५. सुकर्मा मातृदेवो भव, पितृदेवो भव इति वचनम् अवधानेन पालयति स्म।
१. ...................................................................
२. ..................................................................
३. ..................................................................
४. ..................................................................
५. ....................................................................

(४) १. अथ कदाचित दीर्घकर्ण नामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः।
२. मार्जारोऽवदत् – श्रूयतां तावदस्मदवचनम्।
३. अस्ति भगीरथी तीरे गृधकूटनाम्नि पर्वते महान् पर्कटीवृक्षः।
४. तस्य कोटरे जरद्गवनामा गृध्रः प्रतिवसति।
५. तमायान्तं दृष्ट्वां पक्षिशावकैर्भयार्तैः कोलहलं कृतम्।
१. ...................................................................



www.rajteachers.com

२. ..............................................................

३. ..............................................................

४. ..............................................................

५. ..............................................................

(५) १. एकदा महाराजः निद्रां कुर्वन् आसीत्।

२. कश्चित् महाराजस्य राजभवने एकः वानरः सेवकः आसीत्।

३. वानरः कुपितः सन् खड्गेन मक्षिकायाः उपरि प्रहारं कृतवान्।

४. मूर्खः वानरेण महाराजः मारितः।

५. तदा महाराजस्य नासिकायां एका मक्षिका उपविष्टा।

१. ..............................................................

२. ..............................................................

३. ..............................................................

४. ..............................................................

५. ..............................................................

## 6. पत्रलेखनम्

### अवकाशाय प्रार्थनापत्रम्

सेवायाम् ,

प्रधानाचार्यमहोदयाः

राजकीय आदर्श उच्चमाध्यमिकविद्यालयः

सरेडी बड़ी

महोदयाः,

विनम्रनिवेदनम् अस्ति यत् विगतरात्रितः अहं सहसा ज्वरपीडितः अस्मि। अतः विद्यालयम् आगन्तुम् असमर्थः अस्मि। एतेन कारणेन कृपया दिवसत्रयस्य अवकाशं स्वीकृत्य माम् अनुग्रहणन्तु भवन्तः।

दिनांकः– 21.11.20........

भवदीयः शिष्यः

यतीनः

अष्टमी कक्षायां 'अ वर्गः'



www.rajteachers.com

## ७. वर्णोच्चारणस्थानानि

**संस्कृतवर्ण माला-**

। स्वराः- येषां वर्णानाम् उच्चारणं स्वतन्त्रतया भवति ते स्वराः कथ्यन्ते।

स्वराः द्विविधा सन्ति। १. ह्रस्व स्वराः २. दीर्घ स्वराः

१. ह्रस्व स्वराः- एते एकमात्राकालेन उच्चार्यमाणाः - अ इ उ ऋ लृ ह्रस्व स्वराः।

२. दीर्घ स्वराः- एतेद्विमात्राकालेन उच्चार्यमाणाः- आ ई ऊ ॠ ए ओ ऐ औ अष्ट दीर्घ स्वराः। सर्वे मिलित्वा त्रयोदश स्वराः सन्ति।

। व्यञ्जनानि- येषां वर्णानाम् उच्चारणं स्वरेण सहाय्येन भवति ते व्यञ्जनानि कथ्यन्ते।

पञ्चवर्गानां पञ्चविंशति व्यञ्जनानि वर्गीय व्यञ्जनानि कथ्यन्ते।

| | १ | २ | ३ | ४ | ५ |
|---|---|---|---|---|---|
| क वर्गः- | क् | ख् | ग् | घ् | ङ् |
| च वर्गः- | च् | छ् | ज् | झ् | ञ् |
| ट वर्गः - | ट् | ठ् | ड् | ढ् | ण् |
| त वर्गः - | त् | थ् | द् | ध् | न् |
| प वर्गः - | प् | फ् | ब् | भ् | म् |

चत्वारि अन्तस्थः वर्णानि :- य् र् ल् व्

चत्वारि ऊष्म वर्णानिः - श् ष् स् ह्

सर्वे मिलित्वा त्रयस्त्रिंशत् व्यञ्जनानि सन्ति।

### वर्णानाम् उच्चारणस्थानानि

| वर्णस्य उत्पत्तिस्थानम् | | उच्चारित वर्णाः |
|---|---|---|
| १. कण्ठः | - | अ आ क् ख् ग् घ् ङ् ह् विसर्गः |
| २. तालुः | - | इ ई च् छ् ज् झ् ञ् य् श् |
| ३. मूर्धा | - | ऋ ॠ ट् ठ् ड् ढ् ण् र् ष् |
| ४. दन्ताः | - | लृ त् थ् द् ध् न् ल् स् |
| ५. औष्ठः | - | उ ऊ प् फ् ब् भ् म् उपध्मानीयः |
| ६. नासिका: | - | ङ् ञ् ण् न् म् अनुस्वारः |



www.rajteachers.com

७. कण्ठतालुः　-　ए ऐ

८. कण्ठौष्ठः　-　ओ औ

९. दन्तौष्ठः　-　व्

## ८. इमानि अपि अवलोकयत

१. दूरदर्शनम् (डी.डी. न्यूज)

(क) वार्ता　　६.५५ प्रातः प्रतिदिनम्

(ख) वार्तावली　　७.०० सायं शनिवासरे (समयः परिवर्तनशीलः)

(ग) वार्तावली पुनः　　३.३० अपराह्णे बुधवासरे (समयः परिवर्तनशीलः)

२. आकाशवाणी (आल इण्डिया रेडियो)　प्रातः सायं　(प्रतिदिनम्)

३. वृत्तपत्राणि (मैगजींस)

| **क्रम-संख्या** | **नाम** | **प्रकाशनस्थलम्** | **आवृत्तिः** |
|---|---|---|---|
| १. | सुधर्मा | चेन्नई | दैनिकम् |
| २. | गन्धवहः | दिल्ली | मासिकः |
| ३. | ब्रजगन्धा | वृन्दावनः | मासिकः |
| ४. | भारती | जयपुरम् | मासिकः |
| 5. | सम्भाषण-सन्देशः | बंगलौर | मासिकः |
| ६. | चन्दामामा | बंगलौर | मासिकः |
| ७. | अभिव्यक्ति-सौरभम् | प्रयागः | मासिकः |
| ८. | स्वरमंगला | जयपुरम् | त्रैमासिकम् |

4. समाचार-सन्देश-सुविधा

AIR<space>S इति सन्देशं 7738299899 प्रति प्रेषयित्वा स्वजङ्गमदूरवाणी संख्या (Mobile No.) पञ्जीकरणं करणीयम्। तेन प्रतिदिनं दैनिकवार्ताः संस्कृतमाध्यमेन जङ्गमदूरवाणीमध्ये सन्देशरूपेण आयान्ति। एतत् सुविधा निःशुल्कं वर्तते।



www.rajteachers.com